Patanjali
Mahabhasyapradipodyotah

PK
531
A15
1899
v.1
pt.9



UNIVERSITY OF TORONTO
LIBRARY

WILLIAM H. DONNER
COLLECTION

purchased from
a gift by

THE DONNER CANADIAN
FOUNDATION

BIBLIOTHECA INDICA:


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 989.



महाभाष्यप्रदीपोद्योतः ।

MAHĀBHĀṢYAPRADĪPODDYOTA

BY

NĀGEÇA BHAṬṬA

EDITED BY

PAṆḌIT BAHUVALLABHA ÇĀSTRI.

VOL. I, FASCICULUS IX.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1901.

PK 531 A15 1894 V.1 PT.9.

LIBRARY

MAR 19 1969

UNIVERSITY OF TORONTO

FOR SALE

BRARY OF THE

SOCIETY OF BENGAL,

, PARK STREET, CALCUTTA.

AND OBTAINABLE FROM

HE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,

, GREAT RUSSELL STREET, LONDON, W.C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ...	Rs	1	8
Advaitachinta Kaustubhe, Fasc. 1		0	6
***Agni Purāṇa,** (Text) Fasc. 4–14 @ /6/ each		4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5 Vol. III. Fasc. 1–3 Vol. IV, Fasc. 1–5 @ /6/		7	8
Anu Bhāshyam, (Text) Fasc. 1–5 @ /6/ each		1	14
Aphorisms of Sāndilya, (English) Fasc. 1		0	12
Aṣṭasāhasr. Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...		2	4
Āçvavidyā (Text) Fasc. 1–5 @ /6/ each		1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each		10	0
***Bhāmatī,** (Text) Fasc. 4–8 @ /6/ each		1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1–2		0	12
Brhaddēvatā (Text) Fasc. 1–4 @ /6/ each		1	8
Brhaddharma Purāṇa. (Text) Fasc. 1–6 @ /6/ each		2	4
Bodhicaryavatara of Cantidevi, Fasc. 1		0	6
Catalogue of Sanskrit Books and MSS., Fasc. 1–3 @ 2/ each ...		6	0
Çatapatha Brāhmaṇa, Fasc. 1–4		1	8
***Caturvarga Chintāmaṇi** (Text) Vols. II, 1–25; III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 @ /6/ each		19	14
Çlokavartika, (English) Fasc. 1–2		1	8
***Çrauta Sūtra of Āpastamba,** (Text) Fasc. 4–15 @ /6/ each ...		4	8
Ditto Çānkhāyana, (Text) Vol. I. Fasc. 1–7; Vol. II, Fasc. 1–4, Vol. III, Fasc. 1–4 @ /6/ each			10
Çri Bhāshyam, (Text) Fasc. 1–3 @ /6/ each			2
Gadadhara Paddhati Kālasāra Vol I. Fasc. 1–2		0	12
Kāla Mādhava, (Text) Fasc. 1–4 @ /6/ each		1	8
Kāla Viveka, Fasc. 1–4		1	8
Kātantra, (Text) Fasc. 1–6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each		10	8
Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each		3	6
Lalita-Vistara, (English) Fasc. 1–3 @ /12/ each		2	4
Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each...		4	2
Mahā-bhāṣya-pradipōdyōta, (Text) Fasc. 1–8 @ /6/ each		3	0
Manutikā Saṃgraha, (Text) Fasc. 1–3 @ /6/ each		1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–6 @ /12 each		4	8
***Mimāṁsā Darçana,** (Text) Fasc. 7–19 @ /6/ each		4	14
Nārada Smṛti, (Text Fasc. 1–3 @ /6/		1	2
Nyāyavārtika, (Text) Fasc. 1–4 @ /6/		1	8
***Nirukta,** (Text) Vol. III, Fasc. 1–6; Vol. IV, Fasc. 1–8 @ /6/ each ...		5	4
Nyayabinduṭikā, (Text)		0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1–6; Vol. II, Fasc. 1–3 @ /6/ each		3	6
Padumawati Fasc. 1–3 @ 2/		6	0

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY

THE ASIATIC SOCIETY OF BENGAL.

NEW SERIES.—NOS. 939, 948, 958, 962, 969, 970, 974, 978, 989.

MAHĀBHĀṢYA PRADĪPODDYOTA

BY

NĀGEÇA BHATTA.

EDITED BY

PAṆḌITA BAHUVALLABHA ÇĀSTRĪ.


Vol. I.

CALCUTTA:


PRINTED AT THE BAPTIST MISSION PRESS, AND PUBLISHED BY THE ASIATIC SOCIETY, 57, PARK STREET.

1901.

महाभाष्यप्रदीपोद्द्योतः ।



नागेशभट्टविरचितः ।



बहुवल्लभशर्मणा परिशोधितः ।



बङ्गदेशीयासियाटिक्सोसाइट्याख्यसमाजानामनुमत्या
व्ययेन च ।

कलिकातराजधान्यां
वाणिस्तमिश्रयन्त्रे मुद्रितः ।
शकाब्दाः १८२३ ।

(अ. १। पा. १। आ. ९) (अणुदित्सवर्णस्य चाप्रत्ययः। १। १। ६९।)

बुद्धिसन्निहिता इत्यर्थः। अयं भावः। शब्दा उपस्थिता बोधं जनयन्ति। उपस्थितिस्तु स्मृतिरूपा प्रत्यक्षरूपा च न लक्ष्येवेति नियमः। लिपिस्मारितपदैर्बोधानापत्तेरिति॥

सन्निधानमिति। (कै)

प्रतीतिरित्यर्थः। यथायोगमुच्चारणेन संज्ञया वेत्यर्थः॥

प्रतीयमानो ह्रीति। (कै)

यद्यप्युच्चारणे प्रधानमपि अर्थप्रतीतावङ्गभावमतिपद्यते तथाप्युच्चारणकृतायास्तत्तत्प्रतिविम्बविशिष्टस्फोटाभिव्यक्तेश्चिरस्थायितयोपपद्यते। शब्दज्ञानमात्रस्य तु न तदभिव्यङ्ग्यकत्वम्। वक्ष्यमाणहेतोरिति भावः॥

अन्यस्येति। (कै)

दीर्घादिरूपशब्दस्येत्यर्थः॥ भाष्ये

[1]ह्रस्वसम्प्रत्ययादिति। (भा)

द्वतीयातत्पुरुषः॥

ऋगित्युक्ते सम्पाठमात्रं गम्यते। (भा)

एतेनोच्चारितानामेव प्रत्यायकत्वे रहसि पुस्तकमीक्षमाणस्य बोधानापत्तेर्वाचकज्ञानसामान्यस्यैव बोधे तन्त्रत्वेनेदमयुक्तमित्यपास्तम्। मानसजपस्थल इव तत्रापि स्वीयसूक्ष्मोच्चारणाद्बोधेनाचतेः।

---

१ ह्रस्वसम्प्रत्ययादिति चेदुच्चार्यमाणः संप्रत्यायकत्वाच्छब्दस्यावचनम्॥

---

* अत्र "शब्द" इत्यधिकम् बहुषु भाष्यपुस्तकेषु।

जपे हि मन्त्राणां वैस्वर्य्यनियमेन तत्तत्स्थानेषूच्चादिदेशोपलभ्यमानत्वरूपोदात्तत्वादेर्माचाकालिकत्वादिरूपह्रस्वत्वादेश्च विनोच्चारणमनभिव्यक्तेः । यद्वा लिपेरेव चेष्टादिवत्सङ्केतेन बोधकत्वमत एव लिपौ शब्दत्वभ्रमो वालानाम् । यद्वा । लिपावनादेशशब्दतादात्म्याध्यासाद्बोधकत्वम् । लिपौ शब्दत्वबाधज्ञानवतां पण्डितानामप्यन्तः करणादावात्मत्वप्रत्यये भ्रमत्वं जानतामनादिसिद्धारोपेणैव व्यवहारवद्बोधोऽपि ॥ ननु ऋगित्युक्ते तद्विशेषाप्रतीतेरर्थप्रतीतिसम्भावनाया अप्यभाव ऋक्त्वस्य वेदत्वस्य चार्थप्रतीतिजनकतानवच्छेदकत्वादत आह

यद्यपीति । (कै)

ऋक्शब्देन विशिष्टसन्निवेशापि ऋक्प्रत्याय्यत इत्यन्वयः । यच्च सङ्केतादिवशादृगित्युक्ते [१]"अग्निमीले पुरोहितम्" इत्याद्यानुपूर्वीप्रकारेण बोधस्तचापि सा स्वार्थं बोधनादिक्रियाकर्मत्वेन न प्रत्याययतीतिभावः ॥

प्रत्यायनमिति । (कै)

तच्चैतत्सूचनेनैवेति बोध्यम् ॥ अनेन तत्प्रत्यायनमशक्यमित्याह भाष्ये

---

१ ओम् अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् । ऋक्संहि—अ १ । म १ । ग्न १ । ई १ । ऋक् १ ॥ अग्निनामकं देवमीळे । स्तौमि । ईड स्तुतौ । इति धातुः । डकारस्य ळकारो बह्वृचाध्येटसम्प्रदायप्राप्तः । तथा च पठ्यते ।

"अज्झथस्यडकारस्य ळकारं बह्वृचा जगुः ।
अज्झथस्यढकारस्य ळ्हकारं वै यथाक्रमम्" ॥

[1]अवरकालत्वादिति ॥ (भा)

[2]परा सूचादिति। (भा)

"सूचात्" प्रत्याहार सूचात् "परा" परकाला क्रियत इत्यर्थः। तेषामनादित्वादेषां पाणिनिकृतत्वादिति भावः ॥

[3]अवरकालैवेति। (भा)

वाक्यार्थज्ञाने पदार्थज्ञानस्य कारणत्वादितिभावः ॥ "शब्दक्रमः" अष्टाध्यायीक्रमः ॥

[4]प्रत्याहारोत्तरकाला सवर्णसंज्ञेति। (भा)

[5]नाऽज्झलौ (पा)

इत्येतद्विषयनिर्णयोत्तरं तत्परिहारेण सवर्णपदशक्तिग्रहस्यैव व्यवहारोपयोगित्वादितिभावः ॥

वर्णानामुत्पत्ताविति। (भा)

प्रतीतावित्यर्थः ॥ "अक" इत्यादावाद्यवर्णेष्वस्या एव प्रत्याथकत्वाद्ध्याहारेण व्याचष्टे

---

१ वर्णपाठ उपदेश इतिचेदवरकालत्वात्परिभाषाया अनुपदेशः ॥

२ किं परा सूचात् क्रियते इत्यतोऽवरकाला ॥

३ नेत्याह। सर्वथावरकालैव ॥

४ वर्णानामुपदेशस्तावत्। उपदेशोत्तरकालेत्संज्ञा। इत्संज्ञोत्तरकाल आदिरन्त्येन सहेता (१। १। ७१) इति प्रत्याहारः। प्रत्याहारोत्तरकालासवर्णसंज्ञा। सवर्णसंज्ञोत्तरकालमणुदित्सवर्णस्य चाप्रत्ययः इति ॥

५ अ १। पा १। सू १० ॥

अदुउणिति ॥ (कै)

उत्पादयतीति । (कै)

प्रत्याययतीत्यर्थः ॥ "प्रत्याहारे" अदुउणित्यादौ । न च प्रत्याहारेषु तदाच्यवाच्ये लक्षणाङ्गीकारान्न दोषः । उक्तभाष्यरीत्या तदाच्यानां प्रत्यायकत्वाभावेन तेषामशक्तत्वेन लक्ष्यतावच्छेदकलक्षणामूलसम्बन्धज्ञानयोर्दुरुपपादत्वात् ॥ एवं प्रत्याहारेषु सूचप्रयोजनाभावमुक्त्वा [१]"अस्य च्वौ" इत्यादावपि तमाह

[२]तत्रानुवृत्तिनिर्देश इति (भा)

भाष्ये । वृत्तिं वर्णसमाम्नायमनुगतस्तत्सदृशोऽनुवृत्तिरकारादिस्तस्य निर्देशः स्वरूपेणोच्चारणमित्यर्थः ॥ तत्र सवर्णग्रहणे हेतुमाह

व्यक्तीति । (कै)

अनन्ता व्यक्तय इति पक्षे इत्यर्थः ॥ तदाह

अवान्तरभेदेति । (कै)

जात्येकत्वेऽपि व्यक्तीनां परस्परं भेदसम्भवादित्यर्थः ॥ एकाऽवर्णव्यक्तिरिति पक्षे तु यद्यपि भिद्यति तथापि सोऽसङ्गतः । उदात्तादिविरुद्धधर्माध्यासात् यदि तु ध्वनिनिष्ठास्ते तदा कत्वखत्वादिकमपि तन्निष्ठमस्तु किं वर्णैर्नश्चेदनन्ता एवेति भावः ॥ अनणो वचनादपि कथं ग्राहकत्वमत आह

---

१ अ ७। पा ४। सू ३२ ॥

२ तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनणत्वात् । वा ॥

[1]अणसदृश इति ॥ (कै)

उभयम् । (कै)

अनण्त्वमनुच्चारणं च ॥

मध्यपातिनामिति । (कै)

दृष्टान्तार्थम् ॥

नास्तीति । (कै)

अदुउणित्यादावलादि जातिनिर्देशादेषामणत्वं प्रत्याहारग्रहणेषु च न दोषः ॥ "ल्वादय" इत्यादिनिर्देशाच्चैवार्थे लिङ्गमित्युच्यते तदा सूत्रमेव व्यर्थमित्याह

आकृतीति ॥ (कै)

प्रत्याहारे । (कै)

अदुउणित्यादि सूत्रे ॥

अनुवृत्तिनिर्देशे (कै)

[2]"अस्य च्वौ" इत्यादौ ॥

उपदिश्यते । (कै)

उच्चार्य्यते प्रत्याय्यते वा ॥

नान्तरीयकमिति । (कै)

जातेः साक्षादुच्चारणासम्भवात्तदुच्चारणम् । किं च । जातौ

---

१ अणसदृशोऽणिति ग्रहीष्यत इत्यर्थः ॥

२ अ ७ । पा ४ सू ३२ ॥

कार्य्यान्वयस्य व्यक्तिं विना साक्षादसम्भवात्तदुच्चारणं तद्बोधनमित्यर्थः ॥ तत्र दीर्घादिव्यक्त्याक्षेपे बीजमाह

[1]अत्वं चेति ॥ (कै)

प्रमाणकृतभेदे दृष्टान्तमभिधाय गुणकृतभेदेऽप्याह

शुक्ले इति ॥ (कै)

श्रुतिः । (कै)

श्रवणोपलब्धिः ॥

भेदाद्भेद इति । (कै)

जातेरिति शेषः ॥

[2]सत्यपीति । (कै)

श्रुतिभेदो हि व्यक्तिभेदसाधको नाकृतिभेदे साधक इति भावः । अत एव ह्रस्वोऽयमकारो दीर्घोऽयमकार इति अत्वेन सामानाधिकरण्यानुभवः । इकारादिष्वत्वमननुभवान्न । अत एवोदात्तादयो न जात्यन्तरप्रयोजका इति तात्पर्य्यम् । न च आकारोऽयं न अकार इति प्रतीत्यनापत्तिः । तस्या व्यक्तिभेदविषयकत्वात् ॥ भाष्ये

अनेकान्तेनेति । (भा)

अनियमेनेत्यर्थः । अभेदेन सामानाधिकरण्य इति भावः॥ तदाह

---

१ अत्वं च ह्रस्वदीर्घप्लुतेषु विद्यते यथा गोत्वं क्वाग्रे पिण्डे स्थूले शुक्ले कृष्णे चेति ॥

२ सत्यपि श्रुतिभेदे एकाकृतियोगोऽस्त्येव यथा क्वाग्रे स्थूलेऽपि च गोपिण्डे गोत्वयोगः ॥

अभेदस्यापीति ॥ (कै)

प्रत्यभिज्ञानादिति । (कै)

स एवायमितिप्रत्यभिज्ञानादित्यर्थः । अकारोऽकार इत्येकाकारप्रत्ययाच्चेत्यपि बोध्यम् ॥

नासावन्यत्वमिति । (कै)

भेदप्रतीतिमेवेत्यर्थः ॥

प्राणीति । (कै)

यद्यपि प्राणित्वं न जातिस्तथापि साधारणधर्मत्वाभिप्रायेणोक्तम् ॥

गवाश्वरूपेति । (कै)

गोत्वाश्वत्वरूपेत्यर्थः ॥ परे तु ह्रस्वषड्भेदवृत्त्येव अत्वं दीर्घषड्भेदवृत्त्येवात्वमित्यादिः "ननु चेति" भाष्याशयः । सकलव्यापकत्वमप्यस्तीत्युत्तरम् ॥ ननु व्यापकजात्यैक्येऽपि व्याप्यजात्या भेदोऽप्यस्तीत्यत आह

अनेकान्तो हीति । (भा)

व्यापकधर्मेण समानाधिकरणव्याप्यधर्मकृतो भेदः केवलभेदबुद्धिं न करोतीत्यर्थ इत्याशयः ॥ ननु जातिनिर्देशे "[1]अष्टन आ" इत्यादावपि तन्निर्देशादकारादयः स्युर्यत्नाधिक्यं तूभयार्थं स्यात् । ह्रस्वोच्चारणे तु अर्द्धमात्रिकेन तस्यान्तरतम्याद् ह्रस्व एव स्यादत आह

---

१ अ ७। पा २। सू ८४ ॥

अष्टन इति ॥ (कै)

दीर्घव्यक्तीति । (कै)

व्यक्तेरुपलक्षणत्वे आन्तरतम्याद्ध्रस्व एव स्यादिति यत्नाधिक्यानर्थक्यं तदवस्थमिति विशेषणत्वमेव तस्या इति भावः । अत्वातिरिक्तमात्वादि नास्त्येवेति तात्पर्य्यम् । केचित्तुदीर्घषड्भेदवृत्त्यात्वजातेरेवात्वव्याप्यायास्तच्च निर्देश्य इति वदन्ति ॥

अशब्दार्थ इति । (कै)

शब्दजन्यप्रतीतिविशेष्यत्वाभाववानित्यर्थः । यद्वा । शक्यतावच्छेदकत्वेऽप्यशक्य इत्यर्थः ॥

सर्वव्यक्तीनामिति । (कै)

जातिवैशिष्ट्येन प्रत्येकवृत्तिपरस्परभेदत्यागपूर्वकमभेदेनैकरूपेणाश्रयणाज्जात्याक्रान्तसर्वव्यक्तीनां ग्रहणं सिध्यतीत्यर्थः । पूर्ववार्त्तिकेऽणग्रहणाकरणे आकृतिग्रहणं हेतुः । आकृतेरपि भेदशङ्कायामनन्यत्वाच्चेतिवार्त्तिकखण्डः । अपरमते अणग्रहणाकरणे सर्वव्यक्तीनामनन्यत्वं हेतुरनन्यत्वे आकृतिग्रहणम् । आकृतेर्ग्रहणं विशेषणत्वेनाश्रयणं रूपसामान्यादित्ययमाकृतिग्रहणादित्यस्यार्थोऽपरमत इत्येके ॥ जात्याश्रयणमावश्यकमित्याह

तद्वचेति ॥ (भा)

पूर्वा परा वेति । (कै)

उभयोरपि झलत्वं न स्यात् । अन्यतरस्य प्रत्याहारसूत्रेोपात्तादन्यत्वादितिभावः ॥

अवात्तामिति । (कै)

वसेर्लुङि तसस्तामि वृद्धौ "[1]षः सी"ति तत्वे "झलोझली"ति सिज्लोपे रूपम् ॥ ननु "[2]झल" इति सूत्रं क्व चरितार्थमत आह

अबुद्धेति । (कै)

बुधेर्लुङि रूपम् ॥

भेद एवेति । (कै)

व्यक्त्योः परस्परं भेद एवेति भावः ॥ भाष्ये

अनेकान्त इति । (भा)

उपात्ताभेदकधर्मसमानाधिकरणो भेदकधर्म इत्यर्थः । प्रकृतेऽभेदकधर्मस्तत्वम् । प्रयोगार्थं तु मध्यमेत्युक्तेर्द्रुतविलम्बितयोरित्युक्तम् ॥

ह्रस्वदीर्घादीति । (कै)

वृत्त्या कालप्रमाणेन पृथक्त्वमिति ह्रतौयायमाम इतिभावः । भाष्ये तु प्रेषविवक्षया षष्ठी हेतौ पञ्चमी वा ॥

आकृतिग्रहणादिति । (कै)

तदुक्तम् "[3]अदृउण्" सूत्रे भाष्ये "[4]तदत्र तपरकरणम्" । "एवं च कृत्वा तपराः क्रियन्ते । आकृतिग्रहणेनातिप्रसक्तमिति" कृत्वेति ॥

एकाकृतीयोग इति । (कै)

तन्मात्रनिष्ठेत्यादिः ॥

उदिदिति (कै)

---

१ अ ७। पा ४। सू ४९ ॥ २ अ ८। पा २। सू २६ ॥
३ शिव सू १ ॥ ४ शिवसू–वा ॥

कुचुटुतुपूनां प्राचां संज्ञा तथेहापि व्यवहारः । न तु सर्वत्रेत्संज्ञा प्राप्नोति । अनुवादे तदप्राप्तेरिति बोध्यम् ॥ नन्वणग्रहणप्रत्याख्यानेऽनुवादेष्विव विधावपि जातिनिर्देशात् सर्वग्रहणप्रसङ्ग इत्यत आह

भाव्यमानेष्विति ॥ (कै)

यथाश्रुतमिति । (कै)

जातिविशेषावच्छिन्नव्यक्तिविशेषरूपमित्यर्थः ॥

उत्पत्तिवाक्यत्वादिति । (कै)

विधिवाक्यत्वादित्यर्थः । विधौ हि प्रमित्सितत्वादिशिष्टोपादानेन वाक्यार्थभेदोऽनुवादेत्वेतस्य सिद्धत्वेनाऽप्रमित्सितत्वात्तदिशेषणोपादानं न वाक्यभेदमन्तरेण भवति सचाऽन्याय्य इति भावः । यत्तु क्वचिद्विधावपि वाक्यान्तरस्योपादानं तद् "[1]दिव उद्" इत्यादौ तपरत्वालिङ्गादिति द्रष्टव्यमित्याहुः ॥

नान्तरीयकत्वादिति । (कै)

अनेन नान्तरीयकविशेषणविषय एवं विवक्षाऽविवक्षाविचारं प्रतिध्वनयति । अत एव "न श्रेयांसं प्रबोधयेद्" इत्यादौ अनुवाद्यविशेषणश्रेयस्त्वादेर्विवक्षायामपि न दोषः । वस्तुतोऽत्र व्याख्यानमेव शरणम् । नान्तरीयकमङ्गालिङ्गविषयन्यायस्य प्रधानव्यक्तिविषयकत्वानौचित्यात् । उपेयिवानित्यादौ उपेत्यविवक्षाया नञो विवक्षायाश्च दर्शनात् । ऋकारेण ऌकारग्रहणाय तु ऌवर्णस्य ऋवर्णवद्भावो वाच्य इति तात्पर्यम् । परे तु जातिपक्षेऽपि तपरसूत्रस्य जातिग्रहणप्राप्तमवर्णग्रहणनियमार्थत्वात् तत्प्रयुक्तमवर्णग्रहण-

---

१ अ ६ । पा १ । सू १३१ ॥

निषेधायाऽ"प्रत्यय" इति पृथक्कार्य्यमेव। ध्वनितं चेदं [1]"ज्यादादीयस" इति सूत्रे भाष्ये। किं च तत्र व्यक्तिविवक्षायां यत्र क्वचित् प्रयोगे एकाकारव्यक्तिः साध्वी स्याद् न प्रयोगान्तर इति व्यक्तिविवक्षया समाधानं दुर्घटमित्याशयः॥

---

[2]तपरस्तत्कालस्य । १। १। ७०॥

युजेः सम्बन्धवाचकत्वेन सम्बन्धस्योभयनिरूप्यत्वेन सम्बन्ध्यन्तराकाङ्क्षायामाह

न्यायेनेति॥ (कै)

प्रसिद्धत्वादिति। (कै)

---

१ अ ६। पा ४। सू १६०॥

२ तपरस्तत्कालस्य। १। १। ७०॥

अयुक्तोऽयं निर्देशः। तदित्यनेन कालः प्रतिनिर्दिश्यते तदित्ययं च वर्णः तत्रायुक्तं वर्णस्य कालेन सह समानाधिकरणम्। कथं तर्हि निर्देशः कर्त्तव्यः। तत्कालकालस्येति। किमिदं तत्कालकालस्येति।

तपरस्तत्कालस्य। १। १। ७०॥

अयुक्त इति (भा)। न्यायेनासम्बद्ध इत्यर्थः। न्यायशब्दस्य प्रयोगः प्रसिद्धत्वान्न कृतः। कदाचित् प्रसिद्धार्थस्यापि प्रयोगो दृश्यते न्यायेनायुक्तमिति। धात्वर्थेऽन्तर्भूतस्य प्रयोगाभावः। न हि भवति

निष्ठान्तयुजेः प्रायो न्यायसम्बन्धिन्येव प्रयोगादित्यर्थः ॥ नन्वेवं युज्यर्थेऽन्तर्भूतत्वादप्रयोग इति कुतो नोच्यते इत्यत आह

धात्वर्थ इति । (कै)

यद्ययमन्तर्भूतः स्यात्तदा न्यायेनायुक्त इति प्रयोगो न स्यादिति भावः । दण्डेनायुक्त इत्यादि च न स्यादित्यपि बोध्यम् । एतेन मेघो वर्षतीत्यादौ प्रसिद्धा जलमित्यादेरप्रयोगादकर्मकतेति नव्योक्तिः परास्ताः ॥ भाष्ये

प्रतिनिर्दिश्यते इति । (भा)

सामानाधिकरण्येन विशेष्यत इत्यर्थः ॥ "तदित्ययं च वर्ण" इत्यस्य साकाङ्क्षत्वादाह

परामृष्ट इति ॥ (कै)

वर्णस्यैव परामर्शे हेतुमाह

तस्य कालस्तत्कालः । तत्कालः कालो यस्य सोऽयं तत्कालकालः । तत्कालकालस्येति ॥ स तर्हि तथा निर्देशः कर्तव्यः । न कर्तव्यः । उत्तरपदलोपोऽत्र द्रष्टव्यः । तद्यथा । उष्ट्रमुखमिव मुखमस्य सोऽयमुष्ट्रमुखः । खरमुखः । एवं तत्कालकालस्तत्कालः । तत्काल-

---

जीवति प्राणानिति ॥ तदिदित्यनेनेति (भा) । स कालो यस्येति कालसामानाधिकरण्येन तच्छब्दोपादानात् ॥ तदित्ययं च वर्ण इति (भा) । तपरशब्दवाच्यस्यार्थस्य तच्छब्देन परामर्शात् ॥ वर्णस्येति (भा) । वर्णवाचिनस्तच्छब्दस्येत्यर्थः ॥ कालेनेति (भा) । कालवाचिनेत्यर्थः । कालो हि प्रसिद्धपरिमाणा क्रियाऽप्रसिद्धपरि-

तपरेति । (कै)

तः परो यस्माद् इति विग्रहेऽवध्यवधिमतोः साजात्यात् सवर्णत्वस्य वर्णनिष्ठत्वाच्च तेन वर्ण एवोच्यत इति भावः ॥ एकार्थवृत्तित्वरूपसामानाधिकरण्यस्य शब्दधर्मत्वात् कथं "वर्णस्य कालेने"ति भाष्यमत आह

वर्णवाचिन इति ॥ (कै)

सामानाधिकरण्यानुपपत्तिप्रदर्शनायकालस्वरूपमाह

कालो हीति ॥ (कै)

अपरिच्छिन्नस्य विभोः कालस्य व्यवहारानुयोगित्वादाह

प्रसिद्धेति ॥ (कै)

वर्णस्त्विति । (कै)

गुणरूपत्वाद्द्रव्यरूपत्वाद्वेत्यर्थः । जन्यमात्रं कालोपाधिरिति तु न युक्तं दिवसादिव्यवहारस्य सूर्य्यक्रियादिभिरेव दर्शनादिति

स्येति ॥ अथवा साहचर्य्यात्ताच्छब्द्यं भविष्यति । कालसहचरितो वर्णोऽपि काल एव ॥

किं पुनरिदं नियमार्थमाहोस्वित्प्रापकम् । कथं च नियमार्थं स्यात् कथं वा प्रापकम् । यद्यत्राणग्रहणमनुवर्त्तते ततो नियमार्थम् । अथ निवृत्तं ततः प्रापकम् ॥ कश्चात्र विशेषः ॥

मार्गस्य क्रियान्तरस्य परिच्छेदिका यथा दिवसमधीत इति दिवसशब्देनोदयादिरस्तमयान्त आदित्यगतिप्रबन्ध उच्यते स चाऽध्ययनस्य परिच्छेदकत्वात्कालः । वर्णस्तु क्रियात्मको न भवति ॥

तस्य काल इति (भा)। यैव एकस्य वर्णस्य परिच्छेदिकाक्रिया-

भावः । एतत्कालस्वरूपकथनं "[1]कालाः परिमाणिना" इति सूत्रस्थभाष्यविरुद्धमिति तत्रैवोपपादयिष्यते ॥

सैवेति । (कै)

तज्जातीयेत्यर्थः ॥

तदीया क्रियेति । (कै)

उच्चारणरूपेत्यर्थः ॥

क्रियान्तरस्य । (कै)

वर्णान्तरोच्चारणस्य ॥

वर्ण एवेति । (कै)

वर्णाश्रितक्रियागतपरिच्छेदकत्वस्याऽऽश्रये उपचारादर्णपरामर्शिन-स्तच्छब्दस्य मुख्यवृत्तेरेव कालशब्देन सामानाधिकरण्यमित्यर्थः ॥ पूर्वव्याख्यातो विशेषमाह

---

१ अ २ । पा २ । सू ५ ॥

तपरस्तत्कालस्येति नियमार्थमिति चेद्दीर्घग्रहणे स्वरभिन्ना-ग्रहणम् । १ ॥

तपरस्तत्कालस्येति नियमार्थमिति चेद्दीर्घग्रहणे स्वरभिन्नानां ग्रहणं न प्राप्नोति । केषाम् । उदात्तानुदात्तस्वरितानुनासिकानाम् ॥ अस्तु तर्हि ज्ञापकम् ।

निमेषादिः सैव यस्य परस्य स तत्कालकालः ॥ उष्ट्रमुख इति (भा) । गम्यमानार्थत्वाद् द्वितीयमुखशब्दाप्रयोगः । उष्ट्रो मुखमस्योष्ट्र-मुखः । न च प्राणी प्राण्यन्तरस्य मुखमिति सामर्थ्यात् सादृश्य प्रतीतिः । समग्रेण चोष्ट्रेण मुखस्य सादृश्याभावादुष्ट्रशब्दोऽवयवे वर्त्तते मुखेनैव मुखस्य सादृश्यं प्रसिद्धमिति सामर्थ्यादुष्ट्रमुखमिव

वर्णसहेति । (कै)

अनेन लक्षणाबीजं सम्बन्धो दर्शितः ॥ क्रियायाः परिच्छेदकत्वं सापेक्षं न स्वत इति दृष्टान्तेनाह

यथेति ॥ (कै)

भाष्ये

प्रापकमिति । (कै)

स्वतन्त्रविधायकमित्यर्थः ॥

षष्ठ्यामिति । (कै)

अनुनासिकाकारस्य वृद्धिसंज्ञायां फलाभावादवर्माने तदभावाच्चेदं चिन्त्यम् । अत एव वार्त्तिके स्वरभिन्नेत्येवोक्तं न तु गुणभिन्नेति । भाष्येऽप्यदुक्तानुदात्तस्वरितानामित्येव पाठः ॥ ननु

प्रापकमिति चेद्ग्रहणे दीर्घप्लुतप्रतिषेधः । २ ॥

प्रापकमिति चेद्ग्रहणे दीर्घप्लुतयोस्तु प्रतिषेधो वक्तव्यः ॥

विप्रतिषेधात् सिद्धम् । ३ ॥

अण् सवर्णान् गृह्णातीत्येतदस्तु तपरस्तत्कालस्येति वा तपरस्तत्कालस्येत्येतद्भवति विप्रतिषेधेन । अण् सवर्णान् गृह्णातीत्यस्याव-

---

मुखमस्येत्यर्थो गम्यते । एवमिहापि वर्णः कालो न भवति इति सामर्थ्यात्तदीया क्रिया क्रियान्तरपरिच्छिन्ना सती क्रियान्तरस्य परिच्छेदिकेति वर्ण एव परिच्छेदक उच्यते ॥ अथवेति (भा)। वर्णसहचरितायां क्रियायां तच्छब्दो वर्त्तते स कालो यस्येति तद्वर्णसमवेता क्रियापरिच्छेदिकाऽस्येत्यर्थः । यथाऽश्मादिद्रव्यं द्रव्यान्तरपरिच्छिन्नं सुवर्णादीनां परिच्छेदकं तद्वत् क्रियापीत्यर्थः ॥

तत्र तपरत्वसामर्थ्यादस्य सूत्रस्याऽऽवृत्तिमङ्गीकृत्याऽऽवृत्तस्याण्ग्रहणाननुवृत्त्या विध्यर्थत्वान्न दोष इत्यत आह

तपरकरणमिति ॥ (कै)

नन्वाकड़ारादन्यत्र संज्ञासमावेशदर्शनाद्विप्रतिषेधादित्ययुक्तमत आह

विरोधो हीति । (कै)

न हि संज्ञासमावेशे संज्ञात्वं प्रयोजकं किन्तु विरोधाभाव इति भावः । संख्याङ्गतत्यवहारस्य परस्परपरिहारेणैव दृष्टत्वाच्च युगपदसम्भवरूपो विरोध इति तात्पर्य्यम् ॥ तपरत्वसामर्थ्यात् प्रतिलक्ष्यं लक्षणभेदाच्च "अतो भिस" इत्येतद्विषयं "तपर" इति लक्षणमनवकाशमिति न युक्तो विप्रतिषेध इति शङ्कते

अत इतीति ॥ (कै)

तपरत्वस्य सन्दिग्धत्वात् विप्रतिषेधोपपत्तिरित्युत्तरयति

नैतदिति ॥ (कै)

काशः । ह्रस्वा अतपरा अशः । तपरस्तत्कालस्येत्यस्यावकाशः । दीर्घास्तपराः । ह्रस्वेषु तपरेषूभयं प्राप्नोति । तपरस्तत्कालस्येत्येतद्भवति विप्रतिषेधेन ॥ यद्येवं

दीर्घग्रहणं इति (भा) । भेदका उदात्तादय इति भावः । तच्च वृद्धिरादैच् (१ । १ । १) इति षण्णामाकाराणां वृद्धिसंज्ञेष्यते एकस्यैव तु दीर्घस्य स्यात् तपरकरणं त्वैजर्थमेव स्यात् ॥

ह्रस्वग्रहणं इति (भा) । अतो भिस ऐस् (७ । १ । ६) इत्यकारग्रहणे पूर्वसूत्रेण दीर्घप्लुतयोर्ग्रहणं प्राप्नोति । इदं हि सूत्रमनण्-

ऋत इति । (कै)

अत्र भाव्यमानत्वेन सवर्णग्राहकत्वाद्यथा तपरत्वं मुखसुखार्थं तथेत्यर्थः ॥ "ऋत" इति तपरत्वं तु गुणान्तरयुक्तसंग्रहार्थम् । अन्यथोदात्तोच्चारणे जौर्ण इत्यत्र क्ते प्रत्ययसंनियुक्ताद्युदात्तत्वे शेषनिघाते चोदात्तत्वाभावान्न स्यात् । अनुदात्तोच्चारणे जीर्य्-तीत्यत्र न स्यादिति भावः ॥

भिन्नकालानिति । (कै)

परत्वेन पूर्वसूत्रबाधादिति भावः । अप्राप्तिरेवात्र निवृत्तिः ॥ भाष्ये

यद्येवम् (भा)

इत्यस्य एतद्विषये पूर्वसूत्राप्रवृत्तावित्यर्थः । यस्यां वृत्तौ तपर-करणं तदन्यत्र वृत्तौ प्रयोगे ऐमादीनामुपसंख्यानं कार्य्यमिति तात्पर्य्यम् ॥

"अभ्यासार्थं द्रुतावृत्तिः प्रयोगार्थं तु मध्यमा ।
शिष्याणामुपदेशार्थं वृत्तिरिष्टा विलम्बिता ॥"

द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं काल-भेदात् । ४ ॥

द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कर्त्तव्यं तथा मध्यमायां द्रुतविलम्बितयोस्तथा विलम्बितायां द्रुतमध्यमयोः । किं

ग्रहणे चरितार्थम् ॥ विप्रतिषेधादिति (भा)। विरोधो ह्यत्र विद्यते यदि पूर्वसूत्रेणाकारः सवर्णानां ग्राहकस्तदाऽष्टादशानां ग्रहणप्रसङ्गोऽनेन तु षण्णाम् । तत्र परत्वादनेनैव तपरोऽण् सवर्णानां

इति वृत्तिषु उपलभ्य एव भिन्नकाला वर्णास्तु तत्काला एवेत्यभिसन्धाय भाष्ये

किं पुनरिति (भा)

प्रश्नः ॥ तत्तत्कालावच्छिन्नताल्वोष्ठपुटव्यापारजन्या भिन्नकाला एवेत्याशयेन

कालभेदात् (भा)

इत्युत्तरम् ॥

त्रिभागाधिका इति । (भा)

तृतीयभागाधिका इत्यर्थः । कैयटात्तथा प्रतीतेः । त्रयो भागा अधिका इत्यर्थस्त्वचितः । केवलसंख्यावाचकानां पूरणप्रत्ययान्तार्थकत्वे मानाभावात् । तत्रासाधुत्वाच्चेति परे ॥

यस्या नाड़िकाया इति । (कै)

सुषुम्णाया इत्यर्थः ॥

फलानि । (कै)

विन्दवः । ब्रह्माण्डसम्बद्धा साऽमृतविन्दुस्राविणीति प्रसिद्धियोगिनाम् ॥ भाष्ये

पुनः कारणं न सिध्यति । कालभेदात् । ये हि द्रुतायां वृत्तौ वर्णास्त्रिभागाधिकास्ते मध्यमायां ये मध्यमायां वर्णास्त्रिभागाधिकास्ते विलम्बितायाम् ॥

तत्कालानां स्वरूपस्य च ग्राहकः ॥ नन्वत इति तकारोच्चारणसामर्थ्यादनेनैव ग्रहणं भविष्यति किं विप्रतिषेधाश्रयेण । नैतदस्ति ।

सिद्धं त्विति । (भा)

उत्पत्तिपक्षेऽपि उपलब्धीनामेव कालभेदात् वृत्तिवैविध्यम् । वर्णास्तु वृत्तिभेदेऽप्येकरूपा एवेति भावः ॥

अवस्थिताः । (भा)

नियतकालाः ॥

चिराचिरवचनात् । (भा)

चिराचिरकालोच्चारणजनकयत्नाद् जायमानवैकृतध्वनेरुपलब्धीनामेव भेद इति भावः ॥

उपचयापचयौ । (कै)

कालवृद्धिह्रासौ ॥

आलस्यादिभेदादिति । (कै)

आलस्यादिना गतिक्रियाया भेदेऽपि यथा न मार्गभेदस्तथाऽऽलस्यादिनोच्चारणक्रियातो वैकृतध्वनिभेदेऽपि न वर्णस्वरूपभेद इति भावः ॥

सिद्धं त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद्वृत्तयो विशेष्यन्ते । सिद्धमेतत् । कथम् । अवस्थिता वर्णा द्रुतमध्यमविलम्बितासु ।

मुखसुखार्थस्यापि तकारस्य दर्शनात् । ऋत इद्धातोः (७ । १ । १००) इति यथा ॥ यद्येवमिति (भा) । यद्ययं योगस्तत्कालान् प्रतिपादयन् भिन्नकालान् निवर्त्तयतीत्यर्थः ॥ त्रिभागाधिका इति (भा) । द्रुतं श्लोकमर्धं वोच्चारयति वक्तरि नाडिकाया यस्या नव पानीय-

तद्भेदे । (कै)

प्रयत्नभेदे । तद्भेदेनेति तृतीयान्तः क्वचित् पाठः ॥

वृत्तिभेदात् । (कै)

द्रुतादिवृत्तिभेदात् ॥

भिन्नकाला एवेति । (कै)

चिराचिरोपलब्ध्युपयोगिवृद्धिह्रासयुक्ता एवेत्यर्थः । अयं भावः । उत्पत्तिवादिनो वर्णोत्पत्तिं प्रत्युच्चारणव्यापारस्य कारणत्वात् तावत्तावत्कालावच्छिन्नोच्चारणेन ह्रस्वदीर्घादेरिव द्रुतादेरपि तावत्कालस्यैवोत्पत्तिः स्यात् । न चाऽनुनिष्यादीध्वनिरेव तत्कालो न तु वर्ण इति वाच्यम् । विनिगमनाविरहादिति । अतो नित्यमतिरिक्तं स्फोटमादाय समाधत्ते भाष्ये

एवं तर्हीति ॥ (भा)

अत्रेति । (कै)

भाष्ये इत्यर्थः ॥

स च नित्य इति । (कै)

किं द्रुतस्तर्हि वृत्तिविशेषः । वक्तृचिराचिरवचनाद्वृत्तयो विशेष्यन्ते । वक्ता कश्चिदाश्वभिधायी भवति । आशुवर्णानभिधत्ते । कश्चिच्चिरेण

फलानि स्रवन्ति तस्या एव मध्यमायां वृत्तौ द्वादशफलानि स्रवन्ति । नवानां त्रिभागास्त्रीणि फलानि तदधिकानि न च द्वादश सम्पद्यन्ते विलम्बितायां तु वृत्तौ षोड़शफलानि स्रवन्ति ॥ सिद्धं त्विति (भा) । सर्वासु वृत्तिषु न वर्णानामुपचयापचयौ । यथा गन्तृणामालस्यादि-

आकाशादिवदिति भावः॥ ननु स्फोटोऽभिव्यक्तिनित्यत्वं चेत्यत आह

एतच्चेति। (कै)

स एवायमकार इति प्रत्यभिज्ञानाद् एकं पदमिति प्रत्ययाच्च तल्लिङ्गिरित्यन्यच्च विस्तरः॥ ननु ध्वनिरपि शब्दविशेष एव स कथं शब्दगुणोऽत आह

शब्दस्येति। (कै)

व्यञ्जकत्वेन स्फोटोपलब्धिप्रतिबन्धकस्खलितवाय्वपसरणद्वारा स्वधर्मरूपित तदुपलब्धिहेतुत्वेनेत्यर्थः॥ तद्विषयायाः पुनः पुनरुपलब्धेर्नैरन्तर्य्येऽपि न वर्णभेद इति दृष्टान्तेनोपपादयति

तद्यथेति। (कै)

पुनः पुनरुपलम्भोऽविच्छेदेन दर्शनम्॥

ह्रस्वदीर्घेत्यादि। (कै)

तमेवायं विलम्बितमुच्चारित वानन्यो द्रुतमितिवदिह व्यक्तिप्रत्यभिज्ञानाभावादिति भावः। एवं च परिदृश्यमानकालभेद

कश्चिच्चिरतरेण। तद्यथा। तमेवाध्वानं कश्चिदाशुगच्छति कश्चिच्चिरेण गच्छति कश्चिच्चिरतरेण गच्छति। रथिक आशु गच्छत्याश्विक-

---

भेदाद् गतिभेदोऽपि न मार्गभेद इत्यर्थः॥ विषम इति (भा)। वर्णाः प्रयत्नजन्याः। तद्भेदे श्लिष्टभेदाद्भिन्ना काला एव। अध्वा तु व्यवस्थित एव न गन्तृक्रियाजन्यः॥ एवं तर्हीति (भा)। व्यक्तिस्फोटोऽत्र विवक्षितः स च नित्यः। एतच्च "येनोच्चारितेन" इत्यत्र पस्पशायां विचारितमिति तत एव बोद्धव्यम्॥

उपलब्धिगत एवेति तात्पर्यम् । अत्रेदं बोध्यम् । एक एव स्फोटस्तत्तद्वर्णैस्तत्तद्रूपेणाभिव्यज्यते ॥

ध्वनिः शब्दगुण इति (भा)

भाष्ये ध्वनिशब्देन वर्णा वैकृतध्वनिश्च । तत्र वैकृतध्वनेः स्फोटस्य तत्तद्रूपेण पुनः पुनरभिव्यक्तिः कार्य्यमिति तदभिव्यक्तस्फोटस्य तत्कालत्वमेव । ह्रस्वदीर्घप्लुतरूपस्फोटस्तु भिन्नकालावच्छिन्नैर्विजातीयैर्ध्वनिभिरभिव्यक्तो भिन्न एव लौकिकैर्ध्वनिगतभेदेन तद्भेदस्यापि संप्रत्ययात् । कैयटे "ह्रस्वदीर्घप्लुतास्तु खत एव भिन्ना" इत्यस्य व्यञ्जकभेदेनाऽऽरोपितभेदा एव भिन्नर्ध्वनिभिर्वर्णैर्व्यज्यन्त इत्यर्थः । विलम्बितादिवृत्तौ तु स्फोट एकजातीय एव ।

ध्वनिकृता वृद्धिः (भा)

इत्यस्य वैकृतध्वनिकृतोपलब्धिकालवृद्धिरित्यर्थः । वर्णोपरागाभिव्यक्तिजनकयत्नीयकालोपरागेणैव स्फोटस्य भानम् । अत एवाऽस्य प्राकृतत्वेन व्यवहारः । अयं तु वैकृतः । तत्त्वं चालस्यादिकृतत्वात् ।

स्थिरेण पदातिस्थिरतरेण । विषम उपन्यासः । अधिकरणमत्राध्वा व्रजति क्रियायाः । तत्रायुक्तं यदधिकरणस्य वृद्धिश्चासौ स्यातां ॥ एवं तर्हि **स्फोटः शब्दो ध्वनिः शब्दगुणः** । कथम् ।

शब्दगुण इति (भा) । शब्दस्य गुण उपकारको व्यञ्जकत्वेनेत्यर्थः । तद्यथा । घटः पुनः पुनर्दृश्यमानोऽपि न भेदमवलम्बते तथा विलम्बितायां वृत्तावकार एव पुनः पुनरुपलभ्यत इति वृत्तिभेदेऽपि वर्णस्य भेदो न गृह्यते इति सर्ववृत्तिषु तत्कालत्वम् । ह्रस्वदीर्घप्लुतास्तु खत एव भिन्नाभिन्नैर्ध्वनिभिर्व्यज्यन्त इति तेषां कालभेदः ॥

वर्णाभिव्यक्त्युत्तरकालश्चायम्। अयं तूपलब्धेरेव पौनः पुन्ये कारणम्। पौनः पुन्यं चाविच्छेदेनोपलब्धिधारामाश्रित्य न तु विच्छिद्योपलब्ध्या। एतदवच्छिन्नत्वेन तु न स्फोटोपलब्धिः। ह्रस्वाकार एवायमिति प्रत्यभिज्ञानात्। आरोपे सति निमित्तानुस्मरणं न तु निमित्तमस्तीत्यारोप इति न्यायात्। उत्पत्तिवादिनां त्वेवं वक्तुमशक्यमिति स्पष्टमेव॥ ननु "भेर्याघातो" भेरीदण्डादिसंयोगविशेषः स कथं गच्छेदत आह

भेरीमिति। (भा)

कर्मण्यणिति भावः॥ भाष्ये

आहत्य (भा)

तं शब्दमुपलभमान इति शेषः॥ ननु दृष्टान्ते ध्वनेरुपलभ्यमानस्य भेदो न तथेह वर्णस्य श्रुतादिष्विति वैषम्यमत आह

उपलब्धिसामान्ये इति। (कै)

यथा तत्र तस्य ध्वनेस्तावत्कालमुपलभ्यत्वेऽपि तत्तद्वृत्तौ तावत्तावत्कालं तत्तदभिव्यञ्जकरूपदूषितत्वेन परिच्छिन्नत्वेव

भेर्याघातवत्। ५॥

तद्यथा भेर्याघातः। भेरीमाहत्य कश्चिद्दिगतिपदादि गच्छति

भेर्याघात इति (भा)। भेरीमाहन्तीति भेर्याघातः। उपलब्धिसामान्ये दृष्टान्तः। यथा प्रयत्नवशादुत्पन्नो भेरीशब्दः कश्चिदल्पकालमुपलभ्यते कश्चिच्चिरं कश्चिच्चिरतरं च एवं श्रुतिष्वपलब्धीनां कालभेदो विषयस्य त्वभेद एव॥

स्फोटस्योपलम्भमात्रमित्येतावत्येव दृष्टान्तः । न चैतावता स्फोटभेद इति तात्पर्य्यम् ॥ ननु भेर्य्याघातस्थले स्फोटाभावात् स्फोटस्तावानेवेत्यनुपपन्नमत आह

दार्ष्टान्तिकेति ॥ (कै)

भाष्ये

ध्वनिः स्फोटश्च (भा)

स्त इति शेषः ॥ किन्तदित्यत आह

शब्दानामिति ॥ (भा)

व्यञ्जकत्वेन । (कै)

उपलब्धिजनकत्वेन । वैखतध्वनेरप्युपलब्धिपौनः पुन्यकारणत्वाद्व्यञ्जकत्वमिति भावः । तदुपक्रमेणैव भाष्यप्रवृत्तेस्तदुभयं स्वभावतः सिद्धमिति शेषः ॥ ननु तच्च प्रमाणान्तरापेक्षेति भावः । योगिप्रत्यक्षसिद्धं वैतदुभयमिति तात्पर्य्यम् । इदमेव कैयटेन "प्रमाणेने"त्यनेनोक्तम् । वस्तुतस्तु भेर्य्याघातस्थलेऽपि स्फोट एव भेरीताडनाभिव्यक्तः श्रोत्रग्राह्यः शब्दानां चिराचिरोपलब्धि-

---

कश्चित्चिंशत्कश्चिच्चत्वारिंशत् । स्फोटश्च तावानेव भवति ध्वनिकृत्वा वृद्धिः ॥

स्फोटस्तावानेवेति (भा) । दार्ष्टान्तिकोपन्यासः ॥ ध्वनिः स्फोटश्चेति (भा) । व्यञ्जको व्यङ्ग्यश्चेत्यर्थः । शब्दानां व्यङ्ग्यानां सम्बन्धीव्यञ्जकत्वेन यो ध्वनिः स एव महानल्पश्च लक्ष्यते व्यङ्ग्यस्वभिन्नकाल

करात्स्वल्पमहत्ववान् वैकृतध्वनिरेवाल्पत्वादिना लक्ष्यते ॥ "महत्वं" चिरकालत्वम् ॥ वैकृतध्वनिस्फोटयोः प्रमाणमाह

उभयं तदिति ॥ (भा)

तदुक्तं हरिणा ।

"वर्णस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते ।"

"ग्रहणे" तत्तत्कालकत्वेन ग्रहणे ॥

"वृत्तिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते ।"

इति ॥

"शब्दस्योर्द्धमभिव्यक्तेर्वृत्तिभेदाय वैकृतः ।"

इति च ॥ "उभयम्" इत्यावृत्त्या योजनीयम् । उभयं गृह्यत इति शेषः । तेन व्यक्तवाचामुभयम् । अव्यक्तवाचां वर्णधर्मानाक्रान्तध्वनिरेवेत्यर्थः । ध्वनिपदेन प्राकृतवैकृतावुभावप्युच्येते । ग्रहणकर्मीभूतमुभयन्तु प्राकृतवैकृतध्वनिस्फोटरूपम् । वैकृतस्याल्पत्वादिचिराचिरोपलभ्यनुमेयमिति बोध्यम् ॥

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते ।
व्यक्तो महांश्च केषां चिदुभयं तत् स्वभावतः ॥

एवेत्यर्थः ॥ उभयमिति (भा) । व्यक्तो व्यञ्जकश्च प्रमाणेन स्वभावतः स्वरूपेण सिद्धाविति यावत् ॥ केषां चिदिति (भा) । व्यक्तानामुभयं गृह्यते अव्यक्तानान्तु ध्वनिरेव ॥

आदिरन्त्येन सहेता । १ । १ । ७१ ॥

संज्ञयैवेति । (कै)

संज्ञाबोधकेनान्त्यसमभिव्याहृतेच्छब्दसहितादिशब्देनेत्यर्थः ॥ आक्षेपप्रकारमाह

आद्यन्त्यौ चेति । (कै)

यद्यप्यादिशब्दः परमाचमपेक्षते अन्त्यश्च पूर्वमात्रं तथापि सह प्रयुज्यमाणौ मध्यापेक्षाविति भावः ॥ [१]"मध्यमानामेव" इत्येवकारः सौत्रभ्यद्योतकः ॥

स्वंरूपमित्यनुवर्त्तनादिति । (कै)

अन्ये तु आद्यन्त्यशब्दाभ्यामवयववाचकाभ्यामवयवीसमुदाय आक्षिप्त इति सम्बन्धिलेनाविशेषादादेरपि ग्रहणम् । अन्त्यस्य तु न । "आचारादप्रधानत्वाल्लोपश्च बलवत्तर" इत्युक्तेरन्यानुबन्धानामिवास्यापि संज्ञाकार्य्याभावात् । स्वशब्देन विशेषणीभूताऽन्त्यमात्रपरामर्शासम्भवेऽपि विशिष्टपरामर्शे बाधकाभावेनाप्रधानत्वतीयानिर्देशादित्यनया युक्त्या न निर्वाहः । एतत्स्खलितार्थकथनमेव भाष्ये

---

१ आद्यन्त्यौ च मध्यापेक्षाविति मध्यमानामेव संज्ञित्वम् ॥

स्वस्य च रूपस्येति । (भा)

तेन चाद्यन्तशब्दौ पूर्वापरशब्दवन्नावधिमच्छब्दौ किन्त्ववयवशब्दाविति सूचयतीत्याहुः ॥

समुदायादेवेति । (कै)

तस्यैव संज्ञिनार्थेनार्थवत्तया प्रातिपदिकत्वादितिभावः ॥ ननु स्वंरूपमित्यस्यानुवृत्तौ तेनादिवदन्तस्यापि परामर्शः स्यात् किं च महद्ग्रहणेन संज्ञात्व इव संज्ञिन्येऽपि माहित्यापत्तावल्पसंहितादेर्विग्रहस्य यणिति रूपस्य संज्ञिनि दध्यत्रेत्यादौ णकारसंहितः स्यादत आह

स्वं रूपमिति । (कै)

अत्र वदन्ति । समुदितस्य संज्ञात्वे प्रत्याहारेष्वाद्या वाचकास्तत्र ग्रहणकशास्त्रं मावकाशमिति ग्रहणकसूत्रभाष्यविरोधः । टिघुभाद्येकदेशवदस्यापि ग्राहकत्वप्रसक्त्यभावात् । तस्मादाद्यवर्ण एव वाचकः । अन्त्यस्तु तात्पर्यग्राहकः महद्ग्रहणात्तु विग्रहे तदारोपादिग्रिष्ठादिभक्त्युत्पत्तिरिति द्योतकान्तरवैषम्यमिति ॥

येन विधिस्तदन्तस्य १ । १ । ७२ ॥

ननु येनेति करणे तृतीया न कर्त्तरि षष्ठ्यापत्तेः । ग्राह्ये करणं च विशेषणमेवेत्यर्थे भाष्यकृदुक्तमिति । तदन्तस्येति बहुव्रीहिः ।

एवं च इको यण् इत्यादौ विशेष्याभावात् कथमतिव्याप्तिरत आह

शब्दानुशासनेति । (कै)

वस्तुतोऽस्यार्थस्य भाष्येऽग्रे वक्ष्यमाणत्वान्नेतं पूर्वपक्षी जानातीति विशेष्यप्रदर्शनं व्यर्थम् । यत्सम्बन्धी विधिः स तदन्तस्य संज्ञेति सूत्रार्थं मत्वा शङ्का अत एवाग्रे विधेयेनापि तदन्तविधिं वक्ष्यति । विधिरिति च भावे किः । सौत्रत्वाच्च द्वतीयेत्याहुः ॥ नन्वयनमित्यादितश्चयनमित्याद्यर्थाबोधाद् अर्थाभिधानयोग्यस्यैवाऽऽदेशत्वात् कथमत्राऽऽदेशोऽत आह

प्रकरणेति ॥ (भा)

भाष्ये

यथैवेति । (भा)

एचा तदन्तविधावयादेः कार्यित्वम् । अयादेस्तु तदन्तविधौ साधुत्वस्यायादिना बोध्यमानतया कार्यित्वमिति विवेकः ॥

अजादिरिति । (कै)

यस्मिन् विधिरिति परिभाषणादिति भावः ॥

षष्ठ्यनिर्देशादिति । (कै)

पूर्वपरयोरिति षष्ठी तु साधारणीति भावः ॥ तदादितदन्तविध्युपस्थितिसामर्थ्यात्च तदप्रवृत्तिर्बोध्या । अत एव "[1]अलोऽन्यस्य" इत्यादेरप्यवृत्तिरित्याहुः ॥ भाष्ये

---

१ अ १ । पा १ । सू ५२ ॥

अन्तरङ्गबहिरङ्गे इति। (भा)

वर्णमात्राश्रयत्वेन वार्णस्यान्तरङ्गत्वमिष्यते तदपि चेत् समुदायस्य न कोऽपि विशेषः स्यादिति भावः॥

अन्तरङ्गलक्षणस्य (भा)

इत्यस्य तत्त्वाभिमतस्येत्यर्थः॥

बाधक (भा)

इत्यस्य तव मते उभयोः समत्वेन परत्वादिति शेषः॥ "गुणः" "[1]पुगन्त" इत्यनेन॥

गुणो हीति। (कै)

इकारस्येति शेषः। गुणः पञ्चकाश्रयः। ऊठ्तु चतुष्काश्रयः इति विवेकः॥

नानेति। (कै)

अचि यण् प्रत्यये गुण इति भावः। इदं चिन्त्यम्। इयायेत्याद्यसिद्धेः। ज्ञापकासम्भवाच्च। केचित्त्वत्रापि तदादितदन्तविधावस्य वार्णत्वाभावात्तदप्रवृत्तिः सा वक्तुं चाशक्या। वार्णप्रसिद्धेरिति भाष्याशयः। यद्वा तदप्रवृत्तिरनित्यत्वादुभयसम्मतेति भाष्याशय इत्याहुः॥ व्याहतिं निराकरोति

असतीति। (कै)

सति तु तस्मिन्नान्तरङ्गत्वमिति भावः। इदं तु बोध्यम्। एवमपीगन्तशब्दाजादिशब्दमात्रापेक्षत्वं यणो गुणस्य तूक्तरीत्या

---

१ अ ७। पा ३। सू ८६॥

पदार्थपञ्चकापेक्षत्वमिति कथन्न बहिरङ्गत्वम्। तस्मात् संज्ञापेक्षं न बहिरङ्गं गुणादूठ् तु नित्यः। सिद्धान्ते ऊठि कृते यणा बाधाद् गुणो न नित्यः। इदानीं तदसिद्धिरपि दोष इति भाष्याशय इति॥

एवमिति। (कै)

सति तदादितदन्तविधित्वे यणा तुल्यनिमित्त इति न स बहिरङ्ग इति भावः॥ भाष्ये "ऊणग्रब्दमाश्रित्येत्या"दिना यणो बहिरङ्गत्वं गुणस्यान्तरङ्गत्वं दर्श्यते। एवं च परत्वाद्गुणः स्यादिति कैयटस्तिन्त्यः। अनेन हि भाष्येण परिभाषायामङ्गग्रब्दो निमित्तपरो न तु स्थान्यादिपरोऽपीति सूचयति। यण् निमित्तो नग्रब्दावयवत्वेन नग्रब्दस्य ततो बहिष्ट्वाभावः। गुणनिमित्तनग्रब्दादूनग्रब्दस्य बहिर्भूतोऽकारघटितत्वाद्यणो बहिरङ्गत्वमिति भावः॥ भाष्ये

अल्विधिश्चेति। (भा)

स्थानिवदित्यत्र अलो जायमानो विधिरित्यर्थः। अलोऽन्त्यस्यादेग्रो नेति नियमेनेतिग्रेषः॥

थिन्नित्यस्येति। (कै)

कदाचिदिन्नित्यस्येत्यपि बोध्यम्। सर्वथादेग्रस्य स्थानिवत्त्वात् सुलोपः स्यादिति भावः॥ नन्वेवमनेकाल्ग्रिदिति व्यर्थं कदाचिदेकाल्त्वस्यापि सर्वादेग्रत्वसिद्धेरत आह

अनेकालिति॥ (कै)

सर्वस्यैवेति। (कै)

षष्ठीनिर्दिष्टसर्वस्यैवेत्यर्थः॥ प्रकृतं नाम पूर्वत्र निर्दिष्टमनुवर्त्तमानं चेद् "ईदूदेद्विवचनम्" इत्यत्र तदन्तविधिर्न स्यादत आह

प्रस्तुत इति। (कै)

प्रस्तावश्च बुद्धिसन्निधिः। भाष्ये प्रस्तुत इत्यर्थक"प्रकृते" इत्यस्य विशेष्ये इति शेषः॥

तदन्तविधिभाज इति। (कै)

तदन्तश्चासौ विधिभाक् चेति कर्मधारयः। तदन्तशब्दे च बहुव्रीहिरिति बोध्यम्। शब्दरूपं विशेष्यमादाय तु अस्य न सर्वत्र प्रवृत्तिरव्यावर्त्तकत्वादिति भावः॥

कर्म्मसाधन इति। (कै)

भावसाधनत्वेऽपि न बाधकं प्रसिद्धत्वादेव विधेयं कर्म लभ्यते॥

स शब्द इति। (कै)

इह शास्त्रे प्रायः शब्दस्यैव कार्यकरणत्वादिति भावः॥

तेन विशेषणेनेति। (कै)

कार्यविधाविति शेषः। विशेषणत्वलाभोऽप्येवम्। करणस्य व्यापारवत्त्वनियमादन्येषां च व्यापाराभावाद्विशेषणमेवात्र करणशब्देनोच्यते तस्य चेतरव्यावृत्तिकरणमेव व्यापार इति भावः।

---

१ अ १। पा १। सू ११॥

(येन विधिस्तदन्तस्य । १। १। ७२ ।) (अ. १। पा. १। आ. ६)

तच्च प्रत्यासत्त्या शब्दप्रयोज्योपस्थितिविषय[1]विशेषणमेव प्रायेण तदन्तग्राहकमिति "[2]इको यणचि" इत्यादौ न दोषः । क्वचित्तु सति गमकेऽतादृशं [3]शब्दरूपं विशेष्यमादायापि तदन्तविधिरिति भावः । तदपि अन्तरङ्गत्वात् समानाधिकरणविशेषणमेवेति बोध्यम् ॥ भाष्ये

अन्येन चान्यस्येति । (भा)

अनेन यस्य कार्यं यस्मिन् परतस्तयोरकरणत्वं दर्शितम् । अन्यस्येत्यन्यस्मिन्नित्यस्याप्युपलक्षणम् । समाग्रो भोजनम् ॥ सेनाङ्गत्वादेकत्वं प्राप्नोतीत्यत आह

[4]बह्विति । (कै)

बह्वर्थवाचिपूर्वोत्तरपदकत्वाभावाद्बहुस्येत्यर्थः ॥

[5]तस्य । (कै)

गृह्यमाणस्य ॥

---

१ शब्दप्रयोज्योपस्थितिविषयं विशेषणमेव । क । ख । ङ ॥

२ अ ६ । पा १ । सू ७७ ॥

३ शब्दरूपविशेष्यमादाय । क । ख । ग । ङ ॥

४ बहुप्रकृतित्वाभावादेकवद्भावाभावः ॥

५ येन विधिस्तदन्तस्येति चेद्ग्रहणोपाधीनां तदन्तोपाधिप्रसङ्गः (वा) इति वार्त्तिकस्थ "ग्रहणोपाधीनाम्" इति प्रतीकमुपादायोक्तम् । "गृह्यते उच्चार्यते इति ग्रहणं तस्य ये उपाधय इष्यन्ते ते तदन्तस्य संज्ञिनः प्राप्नुवन्ति संज्ञा हि संज्ञिप्रत्यायने विशेषणभावमापन्ना कथमात्मनो विशेषणसम्बन्धमनुभवेत्" ॥

उपाधय इति। (कै)

विशेषणानीत्यर्थः॥

प्राप्नुवन्ति। (कै)

उपाधय इत्यनुकर्षः॥ वार्त्तिके "तदन्तोपाधी"ति भावप्रधानो निर्देश इति बोध्यम्॥ [1]तदन्तसंज्ञायामप्युकारस्यास्तु विशेषणेन सम्बन्धो विरोधाभावादत आह

संज्ञा हीति॥ (कै)

विशेषणभावम्। (कै)

गुणभावम्। यद्वा संज्ञिप्रत्यायने तद्बोधे सति विशेषणत्वमापन्नेत्यर्थः। [2]"आत्मने"ति पाठे स्वयमित्यर्थः। "आत्मन" इति पाठे तु सम्यगेव। "गुणानां च परार्थत्वात् पदार्थैकदेशत्वाच्चे"ति न्यायादिति भावः॥

अवधित्वेति। (कै)

अवधित्वं च तदनारम्भकत्वे सति पञ्चम्यन्तपदवाच्यत्वरूपं पूर्वादियोगे अवयवित्वं च तदारम्भकत्वमिति [3]ते एकस्य न सम्भवत इत्यर्थः॥

ओष्ठः पूर्वो यस्माद् (कै)

इति विग्रहे एष दोषः। षष्ठ्यर्थे बहुव्रीहौ तु यद्यपि पूर्वशब्दस्य

---

१ तदन्तसंज्ञायामप्यकारस्यास्तु विशेषणेन सम्बन्धः— इति बालेन्दाहृतमुद्रापितविवरणपुस्तकेऽस्ति तत्तु न सम्यक्॥

२ "कथमात्मनो विशेषणसम्बन्धम्—" इत्यत्र॥

३ ते एकं प्रत्येकस्य न सम्भवत इत्यर्थः। क। ख। ग। ङ॥

प्रथमावयववाचित्वाद्भूत्वावयवत्वमोष्ठ्यस्य लभ्यते इति नायं दोषस्तथापि सुखूर्षतीत्यादौ दोषो बोध्यः। एवम् [१]"उतश्च" इति सूत्रे पूर्वग्रहस्यावयववाचित्वे प्रत्ययविशेषणत्वासम्भवः। संयोगपूर्वकोकारान्तप्रत्ययभावेन अव्यावर्त्तकतया [२]"असंयोगपूर्वाद्" इति [३]निषेधस्य वैयर्थ्यापत्तेः। न चाङ्गविशेषणत्वं चिण् इत्याद्यभिद्धेरतो व्यवस्थावाची पूर्वग्रहः श्रूयमाणप्रत्ययविशेषणम्। तदुक्तं भाष्ये

पूर्वग्रहणमुकारान्तविशेषणमिति। (भा)

न च असंयोगादिति वक्तव्ये पूर्वग्रहणाद्विशेषणस्याप्युकारस्य विशेषणमिति न दोष इति वाच्यम्। वाच्यवृत्त्याऽलाभात्। किञ्च व्यवहिते चिण् इत्यादावपि निषेधार्थं पूर्वग्रहणं स्यादिति भावः॥ भाष्ये "निपूर्त्याः" इत्यत्र [४]"न ध्याख्या" इति न त्वनिषेधः। विशेषणविशेष्यभावे कामचारेऽपि संज्ञासूत्रस्य प्रबलत्वात् पूर्वं तदन्तविधिरेव स्यादत आह

वृद्ध्यादीति। (कै)

एवं च विशेषणत्वज्ञानसापेक्षतयाऽवान्तरवाक्यार्थबोधोत्तरमेव प्रवृत्त्या बहिरङ्गत्वादस्य पूर्वमुकारादीनामेव तद्विशेषणमिति भावः॥

गुणप्रधानभावानपेक्षा इति। (कै)

एवञ्च तत्र वाक्यभेद एवेति भावः॥

---

१ अ ६। पा ४। सू १०६॥
२ उतश्च प्रत्ययादसंयोगपूर्वात्। ६। ४। १०६॥
३ निषेधवैयर्थ्यापत्तेः। क। ख। ग। इ॥
४ न ध्याख्यापॄमूर्च्छिमदाम्। ८। २। ५७॥

इयन्त्विति। (कै)

तदपेक्षत्वाद्विधिवाक्यैकवाक्यतापन्नैवेत्यर्थः॥ यदुक्तं संज्ञाहीति तत्राह

तत्रेति। (कै)

गुणः कृतात्मसंस्कारः प्रधानोपकाराय महते प्रभवतीति न्यायादिति भावः॥ भाष्ये

[1]यथेष्टमिति। (भा)

विग्रिष्टे वैग्रिष्ट्यं विग्रिष्टस्य वैग्रिष्ट्यं विग्रिष्टे विग्रेषणं तच्च च विग्रेषणान्तरमेकत्र द्वयमिति योगेषु यथेष्टमित्यर्थः। एवञ्च व्याख्यानात् प्रकृते [2]विग्रिष्टवैग्रिष्ट्यमितिरीत्यैव बोधो न तु [3]विग्रेष्ये विग्रेषणमितिरीत्येति तात्पर्य्यम्॥

सुबन्तस्येति। (कै)

"सुपा" दित्युपस्थितस्येति ग्रेषः॥

तद्विग्रेषणत्वेनेति। (कै)

सुबन्तैः श्रितादिभिरित्यर्थ इति भावः॥

---

१ सिद्धान्तु विग्रेषणविग्रेष्ययोर्यथेष्टत्वात्। वा। यथेष्टत्वादित्यनेनेदं दर्शयति। चतुर्विधेषु विग्रिष्टवैग्रिष्ट्यबोधेषु मध्ये विग्रिष्टस्य वैग्रिष्ट्यमेवेह सम्मतं न त्वितरत्त्रिकं व्याख्यानाल्लक्ष्यानुरोधाच्च। इह सिद्धान्ताभिमतं विग्रेषणविग्रेष्यभावं स्फुटीकर्त्तुं बह्वनि वार्त्तिकानि प्रवृत्तानि॥

२ विग्रिष्टस्य वैग्रिष्ट्यम्। क। ग। इ॥

३ विग्रेष्ये विग्रेषणमित्यादिरीत्या —। क। ख। ग। इ॥

श्रितान्तमिति । (कै)

विसर्गान्तस्य तदन्तत्वाभावादिति भावः ॥

सम्बुध्यन्तमिति । (कै)

इदमुपलक्षणं कष्टं परमश्रिता इत्यादेः ॥

तदन्तविध्यभाव इति । (कै)

नड़ादीनां विशेष्यत्वात्प्रातिपदिकस्य विशेषणत्वेऽपि तदन्तस्य नड़ादेरसम्भवादिति भावः ॥ अत्र वदन्ति । एवं हि कृष्णश्रित-मित्यादेरप्यसिद्धिरिति भाष्यस्य निर्दृलत्वापत्तिः । यत्तु सुप्सहितैः श्रितादिभिरितिविवरणकृतः सिद्धान्ताशयवर्णनम् । तन्न । "[1]पूर्व-कालैक" इत्यादौ "सुप" इति प्रथमान्ते तथार्थासम्भवात् । तस्मात् समर्थपरिभाषोपस्थितं समर्थपदार्थं प्रति विशेषणतया प्राप्ततदन्तविधे-र्निषेधार्थमिति भाष्याशयः । उपस्थितसमर्थपदं च सूत्रीयतत्तत्पदो-त्तरविभक्तिसमानविभक्त्यन्तं तस्य च तत्प्रकृतिके लक्षणया "सुपा" इत्यनेनान्वयः । न हि सामर्थ्यं सुबन्तेनैवेति नियमः कुम्भकार इत्यादौ सुपः प्राग्भागेऽपि तदङ्गीकारात् । "परिपूर्णं पदम्" इति न्यायस्तु यस्योत्तरत्राकाङ्क्षायाऽन्वयस्तद्विषयो न तु यत्रान्वयस्तद्विषय इति "[2]कुत्सित" इति सूत्रभाष्यात् स्पष्टमेवोपलभ्यते इति दिक् ॥

तत्र यद्यपीति । (कै)

एवं च ङीबभावेऽपि ङीषा सिद्धिरिति भावः ॥

किं नद्या इति । (कै)

सत्यपि पाठे उपसर्जने ङीषप्राप्तौ ङीपि तस्योदात्तत्वाय

---

१ अ २। पा १। सू ४९ ॥ २ अ ५। पा ३। सू ७४ ॥

तच्चारिताऽर्थाच्चिन्त्यमिदम्। एवं च तस्यावश्यकत्वे पाठो निष्फल इत्यन्यदिति कश्चित्॥ नन्विञो ञित्वादृद्धिस्वराद्यर्थात्तदन्तविधिस्तत्र न हि अग्शब्दस्य "[1]यस्येति च" इति लोपे तेषां सम्भवोऽस्तीत्यत आह

उत्तरार्थमिति। (कै)

वाहविरित्यादौ स्वरादिसिद्धये इति भावः॥

अकचीति। (कै)

सर्वजमिति स्थिते "ऽन्तरङ्गानपी"ति न्यायेन शीभावादि बाधित्वाऽकचि "यस्मात् प्रत्ययविधिरि"त्युकेरप्रत्यय इति निषेधाभावे प्रातिपदिकत्वेन सुपो लुकि पुनर्जसि शी नस्यादित्यर्थः॥

लुगिति। (कै)

यद्यपि "[2]हल्ङ्यादि" सूत्रेणाऽपि सिध्यति तथाऽपि सर्वविभक्त्युत्पत्तिपक्षे इदम्॥

पराङ्गेति। (कै)

तथाच आमन्त्रिताद्युदात्तत्वं स्यात् "[3]चितः स प्रकृतेः" इत्यन्तोदात्तश्चेष्यत इति भावः॥

अन्येत्वाहुरिति। (कै)

अमो मित्त्वेन परश्च इत्यस्य तत्राप्रवृत्तौ तत्संनियोगशिष्टाद्यु-

---

१ अ ६। पा ४। सू १४८॥ २ अ ६। पा १। सू ६८॥

३ चितः सप्रकृतेर्बह्वकजर्थम् (वा) चितः (६। १। १६३) एतत् सूत्रस्य वार्त्तिकम्॥

दात्तत्वाप्रवृत्त्या शेषनिघातेन तस्यानुदात्तत्वप्राप्तिरिति भावः ॥ ननु भिनत्तीत्यादौ "[1]यदागमा" इति न्यायेन न दोष इति चेन्न । अवयवानामवयविग्रहणेन ग्रहणं हि तद्बीजम् । न चात्र तदस्ति । अन्तावयव इत्यंशस्याप्रवृत्त्याऽवयवत्वे मानाभावात् । यस्य विहितस्तदन्तावयव इति तदर्थात् । एवं च नन्दतीत्यत्रे[2]तदुदाहरणं बोध्यम् । भाष्ये च "[3]अम्बत" इत्युपलक्षणम् बोध्यमिति कश्चित् ॥ ननु [4]तदन्तान्तस्येति पाठेऽपि विशेष्यानिधानात् कथं "[5]सर्वादीनि" इत्यादावस्य प्रवृत्तिरत आह

तत्रेति । (कै)

अव्ययेत्यस्यान्वर्थेत्यादिः । वस्तुतः शब्दरूपं विशेष्यमादाय वाचनिक एवोभयत्रापि तदन्तविधिरिति वक्ष्यते । इदं तु चिन्त्यम् । शब्दसंज्ञिनोऽसत्त्वे हि स्यादव्याप्तेपः सत्त्वे त्वाप्तेपे आचिप्तस्य वा विशेष्यत्वे मानाभावात् । किञ्चान्वर्थत्वं योगरूढत्वं योगरूढस्थले हि योगान्वित[6]रूढ्यर्थस्यैव प्रतीतिर्दृष्टा न तु तयोः परस्परमुद्देश्यविधेयभाव इति कस्य विशेष्य तया तदन्तविधिः स्यादिति बोध्यम् ॥

वा प्रकारा इति । (कै)

वा सदृशा इत्यर्थः । "[7]भूवादय" इति सूत्रे द्वन्द्वैकशेषगर्भो

---

१ परिभाषेन्दुशे – ११ ॥

२ एवं च नन्दतीत्यपि तदुदाहरणं बोध्यम् । क । ख । ग । इ ॥

३ अकच्चम्बतः सर्वनाम्नाव्ययधातुविधावुपसंख्यानम् । वा ॥

४ तदन्तान्तस्येति वक्तव्यम् । भा ॥ ५ अ १ । पा १ । सू २७ ॥

६ योगान्वितरूढ्यर्थस्यैव । क । ग । इ ॥ ७ अ १ । पा ३ । सू १ ॥

बहुव्रीहिरितिभावः। एवं हि प्रभूपराभू इत्यादीनामपि धातुसंज्ञा स्यादिति अडाद्यव्यवस्थापत्तिरिति चिन्त्यमिदम्। तस्मादयं समाधिरकच्विषय एवेति बोध्यम्। "[1]एरज्" इत्यादौ तु व्यपदेशिवद्भावेनैतन्न्यासे सिद्धिर्बोध्या॥

न तु सामर्थ्यादिति। (कै)

उष्ट्रमुखवत् तद्भावादित्यर्थः॥

यथाऽवयवेति। (कै)

अवयवी प्रत्यवयवमवयवान्तरसन्निधौ समवेत इति भावः॥ नन्वेवमपि भूयोऽवयवसन्निकर्षस्यैवावयविप्रत्यये हेतुत्वादेकावयवदर्शने तद्वुद्ध्यभाव इत्यरुचेराह

अथवेति॥ (कै)

ननु मुख्यविशेषणे चरितार्थं सूत्रं कथमारोपिते स्यादत आह

गौणेनापीति। (कै)

स्खरितत्वगुणयोगाद्यथाऽन्यत्रारोपितार्थकस्य ग्रहणं तथेहापीत्यर्थः॥ तदेवाह

[2]छत्रेत्यादि। (कै)

छत्रं गुरुच्छिद्रावरणं गौण्योच्यते तत्रैव हि च्छात्र इष्यते।

---

१ अ ३। पा ३। सू ५६॥

२ किं यस्य छत्रधारणं शीलं स छात्रः। किं चातः। राजपुरुषे प्राप्नोति। एवं तर्ह्युत्तरपदलोपोऽत्र द्रष्टव्यः। छत्रमिव च्छत्रम्। गुरुश्छत्रम्। गुरुणा शिष्यश्छत्रवच्छाद्यः शिष्येण च गुरुश्छत्रवत्परिपाल्यः॥

(येन विधिस्तदन्तस्य । १। १। ७२ ।) (अ. १। पा. १। आ. ६)

एवं [१]पार्श्वशब्दोऽनृजूपाये [२]अयः शूल शब्दस्तीक्ष्णोपाये दण्डाजिनो दम्भे [३]शीतोऽलसे उष्णः शैघ्र्ये गौणः। तत्रैव पार्श्विकायःशूलिक-दान्ताजिनिकशीतकोष्णकादिप्रयोगेष्टेः। "[४]तस्यादित" इत्यत्र चार्द्धहरस्वशब्दोऽर्द्धमात्रालाघविक इत्याद्युह्यम्। आदिनाऽऽ[५]"धारोऽधिकरणमि"त्यादिसंग्रहः॥

मध्यपातिन इति। (कै)

यस्याकजादिस्तदेकदेशत्वेनाकजादेर्विज्ञानादिति वार्त्तिकार्थः॥

भाष्ये

[६]अक्तपरिमाणानामिति। (भा)

---

१ किं यः पार्श्वेनान्विच्छति पार्श्वकः। किं चातः। राजपुरुषे प्राप्नोति। एवं तर्ह्युत्तरपदलोपोऽत्र द्रष्टव्यः। पार्श्वमिव पार्श्वम्। य ऋजुनोपायेनान्वेष्टव्यानर्थान्ऋजुनोपायेनान्विच्छति स उच्यते पार्श्वक इति॥

२ किं योऽयः शूलेनान्विच्छति स आयः शूलिकः। किं चातः। शिवभागवते प्राप्नोति। एवं तर्ह्युत्तरपदलोपोऽत्र द्रष्टव्यः। अयः शूलमिवायः शूलम्। यो मृदुनोपायेनान्वेष्टव्यानर्थान्बलेनान्विच्छति स उच्यते आयः शूलिकः॥

३ किं यः शीतं करोति स शीतको यो वोष्णं करोति स उष्णकः। किं चातः। तुषार आदित्ये च प्राप्नोति। एवं तर्ह्युत्तरपदलोपोऽत्र द्रष्टव्यः। शीतमिव शीतम्। उष्णमिवोष्णम्। य आशु कर्त्तव्यानर्थांश्चिरेण करोति स उच्यते शीतक इति। यः पुनराशु कर्त्तव्यानर्थानाशैव करोति स उच्यते उष्णक इति॥

४ अ १। पा २। सू ३२॥ ५ अ १। पा ४। सू ४५॥

६ केचिच्छब्दा अक्तपरिमाणानामर्थानां वाचका भवन्ति। य एते संख्याशब्दाः परिमाणशब्दाश्च। भा॥

अत्र परिमाणमानुपूर्वीविशेषोऽपि ॥ परिमाणेत्युपलक्षणम् परिच्छिन्नार्थानां तदाह

संख्येति ॥ (भा)

भाष्ये

अर्थानामिति। (भा)

संज्ञिभूतानां शब्दानामित्यर्थः ॥ नन्वधिकगङ्गादिजननेऽपि शुनः शुल्ववदकस्याऽधिकस्योपजनेऽपि सर्वकस्य सर्वशब्दमज्ञतमेवेत्यत आह

[1]नित्या इति। (कै)

वस्तुतः परिच्छिन्नपरिमाणकग्रहणे एकदेशविकृतन्यायस्याप्यप्रवृत्तिरितिभाष्याशयः ॥ ननु नित्यशब्दवादेऽकज्वतः शब्दान्तरत्वादकजादेः सर्वाद्येकदेशत्वमसिद्धमत[2] आह

[3]यद्यपीति ॥ (कै)

अव्यतिरेककृत इति। (कै)

अनवयवत्वेऽपि ज्ञापकाङ्गेदबुद्धिं न कुर्वन्तीत्यर्थः। एकदेशसादृश्यं च मध्यपातित्वेन बोध्यम् ॥ ननु सर्वनामत्वे संज्ञोपसर्जनप्रतिषेधवार्त्तिकारम्भेण वार्त्तिककृतोऽन्वर्थत्वं नेष्टं किं च संज्ञिनामुपात्तत्वेनाचेपे मानाभाव इत्यत आह

---

१ नित्या हि शब्दा विकारोपजनरहिता इति ॥

२ इत्यत आह। क। ग। इ ॥

३ यद्यपि नित्याः शब्दास्तथापि प्रक्रियायामकजादयो विधीयमाना ज्ञापकादव्यतिरेककृत इत्यर्थः ॥

अपूर्वो वेति। (कै)

एतद्वार्त्तिकमूलाद् व्याख्यानाद्व्यावर्त्तकमपि शब्दरूपं विशेष्यमादाय तदन्तविधिरितिभावः॥ भयं चाद्यादिचेति द्वन्द्वमभिप्रेत्याह

श्लेमेति॥ (कै)

विधीयत इति। (कै)

सूत्रे विधिशब्देन प्रतिषेधविरोधो न विवक्षित इति भावः॥ ननु "स्वंरूपमि"त्यनुवृत्त्या स्वस्यापि संज्ञासिद्धौ किं "[1]तस्य च" इत्यनेनात आह

स्वमिति। (कै)

तेन सूत्रप्रत्याख्यानादिति तात्पर्य्यम्॥

प्रत्ययान्तत्वादिति। (कै)

स्त्रीप्रत्ययान्तत्वादित्यर्थः॥

स्वरूपविधिविषयैवेति। (कै)

प्रातिपदिकविशेषोपादानविहितकार्य्यविषयैवेत्यर्थः॥

किं पुनः कारणम् (भा)

इति भाष्ये कारणशब्दः प्रयोजनवाची॥

तज्ज्ञापयतीति। (भा)

बोधयतीत्यर्थः। अन्तग्रहणं नियमार्थमिति तात्पर्य्यम्॥

---

१ एतत्सूत्रस्य वार्त्तिकमिदम्॥

नाच तदन्तादिति । (भा)

ननु "[1]समासप्रत्ययविधौ" इत्यस्य विशेषणविशेष्यभावव्यत्यासतात्पर्य्यग्राहकतया दित्यादाविवाचापि तदन्तविधिसम्भवेनान्तग्रहणसामर्थ्यादेव केवलेऽप्रवृत्तावप्रातिपदिकेनेति व्यर्थम् । एतेन "[2]ग्रहणवतेति" निषेधात्तदन्तविधिर्दुर्लभ इत्यपास्तम् । किं च परमदित्यादिभ्य इवाऽनभिधानेन केवले ऽप्रवृत्तिरितिव्यर्थैव सेति चेन्न । विशेषणविशेष्यभावव्यत्यासतात्पर्य्यग्राहकतया "समास" इत्यादिप्रतिषेधवचनवदस्याप्यावश्यकत्वात् सूत्रभाष्यवार्त्तिकारूढ़तात्पर्य्यग्राहकाभावेऽपि तदन्तविधिकल्पने ऽतिप्रसङ्गापत्तेः । अत एव "[3]उगिदचां सर्वनामस्थानेऽधातोः" इत्यादेश्चारितार्थ्यम् । अनभिधानेन प्रत्याख्यानं तु न चमत्कारकारि ॥

[4]सा तर्ह्येषेति । (भा)

"व्यपदेशिवद्भावोऽप्रातिपदिकेन" इत्येषा ॥

यदयमिति । (भा)

"पूर्वाद्" इत्यंशो ज्ञापक इत्यर्थः ॥

---

१ समासप्रत्ययविधौ प्रतिषेधः । वा ॥

२ ग्रहणवताप्रातिपदिकेन तदन्तविधिर्नास्ति । परिभाषेन्दुशे – ३१ ॥

३ एतत्सूत्रस्य वार्त्तिकम् ॥

४ सा तर्ह्येषा परिभाषा कर्त्तव्या । न कर्त्तव्या । आचार्यप्रवृत्तिर्ज्ञापयति व्यपदेशिवद्भावोऽप्रातिपदिकेन इति यदयं "पूर्वादिनिः" "स पूर्वाच्च" (५–२–८६, ८७) इत्याह । नैतदस्ति ज्ञापकम् । अस्ति हि अन्यदेतस्य वचने प्रयोजनम् । किम् । स पूर्वात्पूर्वादिनिं वक्ष्यामीति । तत्तर्हियोगविभागं करोति ॥

सर्वस्मादिति । (कै)

पूर्वशब्दव्यतिरिक्तादपीत्यर्थः॥ भाष्ये

यत्तर्हि योगविभागमिति । (भा)

न च "[1]दृष्टादिभ्यश्च" इत्यत्रानुवृत्त्यर्थं तथा पाठोऽत एवानिष्टीति प्रयोगसिद्धिरिति वाच्यम्। एतद्भाष्यप्रामाण्येन तत्प्रयोगाभावानुमानात्। प्रकारान्तरेण सिद्धौ तु नास्माकं क्षतिः। एकयोगेऽपि तावति स्वरितत्वप्रतिज्ञासामर्थ्येन तावत उत्तरत्रानुवृत्तिसिद्धेश्चेति दिक्। एवं च "[2]रोणी"त्यादौ केवलस्याप्राप्ते"[3]स्तस्य चेति वक्तव्यमि"ति सिद्धम्॥ ननु तदन्तविधिविषये "तस्य च" इत्यनेन केवलादपि चेद् "व्यपदेशिवद्भावोऽप्रातिपदिकेन" इति व्यर्थमत आह

अप्रातिपदिकेनेति । (कै)

ज्ञापकस्य सजातीयापेक्षत्वादितिभावः। अत एव "[4]पूर्वादिनिरि"त्येव तदन्तविधिना सिद्धे "[5]स पूर्वाच्च" इत्यस्य "[6]ग्रहणवते"ति परिभाषाज्ञापकत्वं कैयटोक्तं संगच्छते॥

यत्रान्तेति । (कै)

अन्तग्रहणमुपलक्षणम्। अत एव "[7]एकगोपूर्वाद्" इत्यस्य केवलैकशब्दे न प्रवृत्तिः। "ग्रहणवते"त्यपि प्रत्ययविधौ निषेधस्यै-

---

१ अ ५। पा २। सू ८८॥ २ अ ४। पा २। सू ७८॥
३ तस्य च। वा। तस्य चेति वक्तव्यम्। भा॥
४ अ ५। पा २। सू ८६॥ ५ अ ५। पा २। सू ८७॥
६ परिभाषेन्दुशे – ७१॥ ७ अ ५। पा ४। सू ११८॥

वानुवादकं लाघवात्। स्पष्टं चेदम् "[1]असमासे निष्कादिभ्य" इति सूत्रे भाष्यकैयटयोः॥ रथ्ये "[2]तद्वहति रथ" इतियत्। सीत्ये "[3]नौ वयोधर्म" इति। हल्ये "[4]मतजनहलात् करणजल्पकर्षेषु" इति यत्॥ भाष्ये

परमरथ्य इति। (भा)

रथाद्रथाङ्गवोढ्रोरित्येवं प्रैषिकप्रकरणे पाठे सिद्धे "तद्वहती"-त्यत्र रथग्रहणं रथांगे तदन्तविधौ ज्ञापकं प्रैषिके यति हि द्विरथ इत्यादौ "[5]द्विगोर्लुग्" इति लुक् तत्र सूत्रेऽचीति न सम्बध्यते-ऽनभिधानाच्च नातिप्रसङ्गः। वहत्यर्थे तु द्विरथ्य इत्येव। तस्या-प्राग्दीव्यतीयत्वात्। इतरयोस्तु वाचनिक एव॥ यत्तु "[6]हलसी-राट्टग्" इत्यपि "[7]तस्येदम्" "तद्वहति" इत्यधिकारे च द्विः पठ्यते तत्तु इदं शब्देन वोढृरूपार्थाग्रहणज्ञापकं तदाह

ठञ्न भवतीति॥ (कै)

भाष्ये

सुपाच्चालक इत्यादि। (भा)

"[8]जनपद" इत्यधिकारे "[9]अवृद्धादपि बहु" इति वुञ्

---

१ अ ५। पा १। सू २०॥
२ अ ४। पा ४। सू ७६। अ ४। पा ३। सू १२१॥
३ अ ४। पा ४। सू ६१॥ ४ अ ४। पा ४। सू ६७॥
५ अ ४। पा १। सू ८८॥ ६ अ ४। पा ४। सू ८१॥
७ अ ४। पा ३। सू १२०॥ ८ अ ४। पा २। सू १२४॥
९ अ ४। पा २। सू १२५॥

(येन विधिस्तदन्तस्य । १। १। ७२ ।) (अ. १। पा. १। आ. ६)

तद्विधौ चायं तदन्तविधिः। "[1]सुप्तिङन्तं पदम्" "[2]दिग्गो-मट्टाणाम्" इत्युत्तरपदवृद्धिः॥

वृद्धिमानिति। (कै)

वृद्धिनिमित्तमित्यर्थः॥

अवयवानामिति। (कै)

पूर्वपदत्वे इति शेषः। "[3]पूर्वापराधरे"त्येकदेशिसमासः। "[4]सन्धिवेलाद्यृतु" इत्यण्। "[5]अवयवादृतोः" इत्युत्तरपदवृद्धिः॥ ननु ग्ररच्छब्द एव कालवाची न तु पूर्वग्ररच्छब्द इति कथं ठञ् इत्यत आह

तच्च हीति। (कै)

अत एव "[6]सन्धिवेलादि"सूत्रे नञ्चाणां कालेन विशेषणं संगच्छते॥ भाष्ये

[7]ठञ्विधौ संख्याया इति। (भा)

"[8]तदस्य परिमाणम्" "[9]संख्यायाः संज्ञा" इति सूत्रे इति भावः॥

द्वे षष्ठी परिमाणमस्येति। (कै)

संघादिरस्य विशेष्यः॥

---

१ अ ७। पा ३। सू १२॥ २ अ ७। पा ३। सू १३॥

३ अ २। पा २। सू १॥ ४ अ ४। पा ३। सू १६॥

५ अ ७। पा ३। सू ११॥ ६ अ ४। पा ३। सू १६॥

७ ठञ्विधौ संख्यायाः। वा। ठञ्विधौ संख्यायाः प्रयोजनम्। भा॥

८ अ ५। पा १। सू ५७॥ ९ अ ५। पा १। सू ५८॥

प्रतिषेधादिति । (कै)

"[1]आर्हादगोपुच्छात्" इत्यनेन तस्य प्रत्ययप्रतिषेधत्वात्तच्च [2]तदन्तविधिर्भवितव्येव । तेन "[3]प्राग्वतेः" इति ठञ्विधायके "[4]संख्यायाः संज्ञा" इति सूत्रे तदन्तविधिसत्त्वेन "प्राग्वतेः" इत्यधिकारप्राप्तष्ठञ् भवतीत्यर्थः ॥

पुनः प्रत्ययार्थसमर्थेति । (कै)

अस्येति प्रत्ययार्थः । तदितिसमर्थविभक्तिः । अनुवर्त्तमानस्य लुक्सम्बद्धतया पुनरुपादानेन तद्विलक्षणत्वसूचनादनेन विहितस्य लुगभाव इत्यर्थः ॥

कृते वेति । (कै)

अनुवर्त्तमानसोऽस्येति सहितपरिमाणमित्यनेन विहितस्य लुकि पुनस्तदस्य परिमाणमिति वचनसामर्थ्यात् स्वार्थे तज्जातीयप्रत्यये तस्य विधानसामर्थ्याद् द्विगुनिमित्तत्वाभावाद्वा लुगभाव इत्यर्थः । इदं वृत्तिकारमतेनोक्तम् । वस्तुतस्तु "[5]तदस्येति" पुनरुपादानमात्रेणार्हीयत्वापगमे तत्रेऽपि लुगभावे वा द्वे षष्टी जौहितपरिमाणमस्येत्यर्थेऽनेन ठञि लुकमाशङ्क्य "कालाद्" इत्यधिकारस्थेन "[6]तमधीष्ट" इति सूत्रेण टञा द्विषाष्टिकः साधितो भाष्ये

---

१ अ ५ । पा १ । सू १९ ॥
२ तदन्तविधिर्भवत्येव । क । ख । ग । इ ॥
३ अ ५ । पा १ । सू १८ ॥ ४ अ ५ । पा १ । सू ५८ ॥
५ अ ५ । पा १ । सू ५७ ॥ ६ अ ५ । पा १ । सू ८० ॥

कालग्रहणेन यथाकथंचित्कालवाचिनो ग्रहणमिति चोक्तं तद्विरुध्येत । तद्रौत्याऽनेनापि ठञि लुगभावात् । तस्माद् द्वे षष्ठी परिमाणमस्य संघस्य स परिमाणमस्येति भाष्योदाहरणार्थः । तत्र द्विगुनिमित्तत्वाभावान्न लुक् । संघे द्विषष्ट्यानतिरेकस्यापि सत्त्वात् तस्यापि संख्याशब्दत्वमित्यपरे॥ भाष्ये

[1]पदाङ्गेति । (कै)

तदन्तविधेरपवादोऽयम् । अत एव "तस्य च" इति पुनरभिहितं तदन्तविधौ हि बहुच् पूर्वेऽपि स्यात् तच्च नेष्टमिति वार्त्तिकाशयः ॥

पदशब्देनेति । (कै)

अत एव भाष्ये उत्तरपदाधिकारे प्रयोजनदानम् ॥ तदन्तविध्यपवादत्वादस्यापि विशेषण एव प्रवृत्तिरित्याशयेनाह

उत्तरपदेनेति । (कै)

शब्दरूपं विशेष्यमादायेत्यन्ये ॥

समासान्त निषेध इति। (कै)

"[2]ऋक् पूरब्" इति प्राप्ते । अत एव "[3]द्व्यन्तरुपसर्ग" इतीत्वं न तत्र ह्यप इति कृतसमासान्तानुकरणं व्यत्ययेन षष्ठ्यर्थे प्रथमा । अत्र चेदमेव भाष्यं मानमित्याहुः ॥

---

१ पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य च ॥

२ अ ५। पा ४। सू ७४ ॥ ३ अ ६। पा ३। सू ६७ ॥

तत्वमपीति । (कै)

वार्त्तिकस्थेन "[1]दीर्घविधौ" इति विषयनिर्देशेनेदं विरुध्यते ॥

भाष्ये

[2]पद्युष्मदस्मदस्थ्यादीति (भा)

समस्तं पृथक् पदम् ॥

अनडुहः (भा)

इति त्वसमस्तमेव । अन्यथा नुमोऽनडुच्छब्दमात्रान्वयित्वेनासामर्थ्यात्समासो न स्यात् । पदाद्योऽनडुहो नुम् च तदन्तविधिं प्रयोजयन्तीत्यर्थः । समासे एव "[3]पादस्य लोप" इत्यन्तलोपविधानात् सामर्थ्यादेव तदन्तविधिर्भविष्यतीत्याशयेन काक्षा पृच्छति भाष्ये

[4]अस्तिचेति ॥ (भा)

आचार्यदेशीय आह

एवं तर्हीति । (भा)

सन्निधेर्लिङ्गं बलीय इति भावः ॥

---

१ महदपस्खलनमणां दीर्घविधौ । वा ॥

२ पद्युष्मदस्मदस्थ्यादिनडुहो नुम् । वा ॥

३ अ ५ । पा ४ । सू १३८ ॥

४ अस्ति चेदानीं कश्चित् केवलः प्राच्छब्दो यदर्थो विधिः स्यात् । नास्तीत्याह । एवं तर्ह्यङ्गाधिकारे प्रयोजनं नास्तीति कृत्वा पदाधिकारस्य प्रयोजनमुक्तम् ॥

तदन्तविधिरिति । (कै)

तदपवाद उत्तरपदविधिरित्यर्थः ॥ अर्थाधिकाराश्रयेण परिहरति

नैषेति ॥ (कै)

नन्वेवं पादशब्देन तदन्तविध्यभावे परमपत्काषिणाविति पूर्वोदाहृतासङ्गतिरत आह

एवं चेति । (कै)

अर्थभेदेन तत्साध्विति भावः ॥ पादशब्दादाख्याननिचि णिनिमित्तकटिलोपस्य स्थानिवत्त्वात्पदादेशाऽ प्राप्तेराह

पदेरिति । (कै)

"क्वौ लुप्तम्" इति निषेधान्न णिलोपस्य स्थानिवत्त्वमित्यर्थः । अत एव "पादस्य पादहस्त्यादिभ्य" इति नासूचि तथा सति तस्यैव प्रतिपदोक्तत्वात् पद्भावः स्यान्नास्येतितात्पर्य्यम् ॥

इह । (कै)

"[1]द्युपथि" इति प्रयोजनवार्त्तिके ॥

इत्यत एवेति । (कै)

"पद्युन्नदि"ति वार्त्तिकस्यादित्यर्थः ॥

आदित्यधिकारादिति । (कै)

"[2]आच्छी"त्यतः । अन्यथा नुम् बाधकः स्यात् । अम् च नुमो बाधकः स्यादिति भावः ॥

---

१ द्युपथिमथिपुंगोसखिचतुरनडुच्चित्रग्रहणम् । वा ॥

२ अ ७ । पा १ । सू ८० ॥

अन्यथाऽमामोरेवेति । (कै)

"चतुः" साहचर्य्यादितिभावः ॥

अन्यत्र चेति । (भा)

भाष्यादङ्गाधिकारादन्यत्र प्रत्ययविधानेऽपि वर्णग्रहणे तदन्त-विधिरिति मत्वा नोद्यति ॥

यद्येवमिति । (कै)

"अन्यत्र" इत्यनेन भाष्येण "[1]इको झल्" इत्यादौ निषेधा-भावात्तदन्तविधिरनुज्ञायते । एवञ्च प्रत्ययविधौ वर्णग्रहणे स प्रतिषेध एव स्यादतस्तत्र वर्णग्रहणमिति परिहरति

उच्यत इति ॥ (कै)

सिद्धे तदन्तविधाविति । (कै)

उक्तवचनेन वाचनिक इत्यर्थः । यत्तु प्रत्ययाच्छिन्नप्रकृति-प्रत्ययावयवकसमुदायस्य विशेषणादेतत्सूत्रसिद्ध एव स इति । तन्न । तादृग्रार्थस्य नियतात्वेपे आच्छिन्नस्य वा ग्राह्येऽन्वये माना-भावात् । किञ्च "[2]वनो रच" इत्यादौ "समासप्रत्ययविधौ" इत्यनेन अस्यापि निषेधापत्तिः । मम तु सौत्रस्यैव स निषेध इति न दोषः ॥ पञ्चम्यन्तात् परः प्रत्ययो यत्र कार्य्यान्तर विधा-नायाऽनुद्यते तच्छिन्नस्थले प्रत्ययग्रहणं तदन्तविधेः प्रयोजनम् इति वार्त्तिकार्थस्तदाह

यत्रेत्यादि ॥ (कै)

---

१ अ १। पा २। सू ९ ॥ २ अ ४। पा १। सू ७ ॥

परिगृह्यते । (कै)

अनुद्यते ॥

नत्वं स्यादिति । (कै)

दृषत्तीर्णेत्यादौ धातोस्तकारस्य तत्पूर्वदस्य च तत्स्यादित्यर्थः ॥

न च संज्ञाविधाविति । (कै)

संज्ञया विधावित्यर्थः इत्यभिमानः ॥

यच्च हीति । (कै)

संज्ञाया विधौ स निषेधो न तु संज्ञया विधौ ॥

तर्हीति । (कै)

प्रदेशेषु तदन्तग्रहणं यदि तर्हीत्यर्थः ॥

पुनस्तदन्तेति । (कै)

घादिभिरुत्तरपदस्य विशेषणादिति भावः ॥

तस्मादिति । (कै)

"[1]संज्ञाविधौ प्रत्ययग्रहणे" इति "[2]प्रत्ययग्रहणे चापञ्चम्या" इति वचनाभ्यामिति भावः ॥

नायमर्थ इति । (कै)

प्रत्यासत्त्या चास्यार्थस्य प्रसक्तिः ॥

पञ्चम्यन्तादिति । (कै)

पञ्चम्यन्तनिर्दिष्टप्रत्ययादित्यर्थः । "समासप्रत्ययविधौ" इति तु सौत्रस्य निषेध इति न तेनाऽस्य गतार्थतेतिभावः ॥

---

१ परिभाषेन्दुशे २८ ॥ २ प्रत्ययग्रहणे चापञ्चम्याः ॥

तत्प्रत्ययादेव । (कै)

विकारावयवविहितप्रत्ययादेव । एवं चोष्ट्रविकारादौष्ट्रकादञि वुञ एव वृद्धिस्वरौ स्यातामित्यर्थः ॥ भाष्ये

[1]यञिञोः फगिति । (भा)

यद्यपि "[2]ङ्याप् प्रातिपदिकाद्" इत्यधिकाराद् "अपञ्चम्या" इति निषेधस्तत्र प्राप्नोति तथापि न तद् व्यधिकरणं विशेषणं किन्तु "[3]यञिञोः" इति पञ्चम्यर्थं षष्ठीसत्त्वात् तस्य समानाधिकरणं विशेष्यमिति "अपञ्चम्या" इत्यस्याऽविषयोऽयमितिभावः ॥

तस्मादिति । (कै)

"[4]प्रत्ययग्रहणे यस्मात् स विहित" इति नियमोऽत्रापि तदन्तविधावपेक्ष्य एव । एतत्सिद्ध एव च तदन्तविधिस्तत्रानूद्यते उक्तनियमबोधनाय । अन्यथा परमगार्ग्यशब्दात् फकि पारमगार्ग्यायण इति स्यादितिन्यायव्युत्पादनार्थमित्यर्थः ॥ नन्वेतद्रीत्या परमश्चासौ गार्ग्यायण इति भाष्योदाहरणार्थः । नहीदृशेऽर्थे परमगार्ग्यशब्दस्य प्रकृतित्वसंभावनापीति कथमेतन्न्यायप्रदर्शनमनेन भाष्येणेति चेन्न । परमगार्ग्यैकदेश गार्ग्यशब्दादेव प्रत्ययः परमगार्ग्यस्यापत्यमित्यर्थेऽपि उक्तन्यायादित्यदोषात् । विशिष्टैनैकार्थीभावेऽवयवेनापि तस्य सत्त्वमस्त्येव निष्कृष्यैकार्थीभाव एव वृत्तौ

---

१ यञिञोः फग् भवति ॥ २ अ ४ । पा १ । सू १ ॥
३ अ ४ । पा १ । सू १०१ ॥ ४ परिभाषेन्दुशे २४ ॥

निमित्तमित्यत्र न मानम्। अत एव "[१]अनुपसर्जनाद्" इति सूत्रे कुम्भकारीग्रब्दैकदेशात् कारीग्रब्दादण्युत्पत्तिः ग्रङ्किता भाष्ये। अस्य कैयटस्यापत्यैव तात्पर्य्यम्। "[२]एतन्न्याय" इत्यस्यापि "यस्मादिहित" इत्यादिन्यायेन समस्तैकदेशात् प्रत्यय इत्येतन्न्यायेत्यर्थः। नचैवं "[३]सुपि च" "[४]रोः सुपि" इत्यादौ सुबन्ते इत्यर्थापत्तिः। न हि तत्र पञ्चम्यन्तात्परत्वेन प्रत्ययो विग्रेष्यत इति वाच्यम्। "[५]तस्मिन्निति" परिभाषया सुपि परे इत्यर्थे नियमेन कस्मादित्यवधिसाकाङ्क्षत्वेनोपस्थिताङ्गादेरेवावधित्वेनान्वयेन पञ्चम्यन्तस्य विग्रेषणत्वेन निषेधप्रवृत्तेरित्याहुः॥ ननु "येन

---

१ अ ४। पा १। सू १४। अत्र भाष्यम्—इदं तर्हि प्रयोजनम् प्रधानेन तदन्तविधिर्यथा स्यात्। कुम्भकारी नगरकारी। अत्र हि प्रत्ययग्रहणे यस्मात् स तदादेर्ग्रहणं भवतीत्यवयवादुत्पत्तिः प्राप्नोति। कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवतीति संघातादुत्पत्तिर्भविष्यति। कृद्ग्रहण इयुच्यते नचैतत्कृद्ग्रहणम्। कृदकृद्ग्रहणमेतत् कृदण्ययमण् तद्धितोऽपि एवं तर्हीकारान्तेन समासो भविष्यति। यद्येवं लभ्येत कृतं स्यात्तत्तु न लभ्यम्। किं कारणम्। अत्र हि गतिकारकोपपदानां कृद्भिः सह समासो भवतीति समास एव तावद्भवति समासे च कृतेऽवयवादुत्पत्तिः प्राप्नोति। अवयवादुत्पत्तौ सत्यां को दोषः। कौम्भकारेयो न सिध्यति। अवयवस्य वृद्धिस्वरौ स्याताम्। तस्मादनुपसर्जनाधिकारः॥

२ अत्रैव कैयटे॥ ३ अ ७। पा ३। सू १०२॥

४ अ ८। पा २। सू ६९॥ ५ अ १। पा १। सू ६६॥

नाप्राप्ति" न्यायेनायं निषेधो वाचनिकतदन्तविधेरेवेति "[1]घरूप" इत्यादौ उत्तरपदस्य विशेष्यतया प्राप्ततदन्तविधिः स्यादेवेत्यत आह

उत्तरपदेति। (कै)

अन्यथा "[2]हृदयस्य हृल्लेखयदण्" इत्यत्राण् ग्रहणेनैव सिद्धे लेखग्रहणं व्यर्थं स्यात्। लेख इत्यणन्तमेव तत्र गृह्यते घञन्तस्य त्वनभिधानात्तत्राग्रहणमेवेति भावः। अयमपि निषेधो विशेषण-विशेष्यभावव्यत्यासमूचक एवेत्याह

तत्रेति॥ (कै)

प्राधान्येनेति। (कै)

शब्दरूपापेक्षयेत्यर्थः॥

धातोरिति। (कै)

इदं "[3]स्तताभि" विशेषणमिति चिन्त्यमिदम्। "[4]सुपि च" इत्यादौ अस्मदुक्तरीत्यैवात्रापि समाधानं बोध्यम्॥ नन्वलाऽनर्थकेनेत्ययुक्तमर्थवत्परिभाषया विरोधादत आह

अर्थवदिति॥ (कै)

स्थितमिति। (कै)

"[5]स्वंरूपम्" इतत्रेति शेषः॥ कुतो हेतोरित्यत आह

---

१ अ ४। पा ३। सू ७३॥ २ अ ६। पा ३। सू ५०॥
३ अ ३। पा १। सू ३३॥ ४ अ ७। पा ३। सू १०२॥
५ अ १। पा १। सू ६८॥

वर्णरूपतया तस्येति । (कै)

"वर्णरूपतया यस्ये"ति पाठे नार्थवत्तारूपमित्यतः प्राक् तस्य हीतिशेषो बोध्यः ॥

अर्थवत्तेति । (कै)

तत्त्वसमानाधिकरणं रूपमित्यर्थः । "वर्णसमुदायग्रहणं प्राप्नम्" इति पाठे ऽनर्थकेत्यादिः । तदपि प्राप्नमिति शेषः ॥

गुणत्वादिति । (कै)

तदन्तविधिनियमशेषत्वादित्यर्थः । वर्णसमुदायेन चेत्तदन्तविधिस्तर्ह्यर्थवतैवेति फलितम् । अन्ये तु अङ्गाधिकारे तदन्तविधेरतिप्रसङ्गस्य निवारणायेदम् ।

[1]वर्णग्रहणं च (वा)

इत्यन्वाख्यानवार्त्तिके ज्ञापकसिद्धजातिग्रहणे न मानम् । एवम् "[2]अलैव" इत्यत्रापि "[3]एकत्वसंख्यागुणत्वाद्" इत्यपि चिन्त्यम् । जातिपरत्वे तद्गतसंख्याया एव तदुत्तरविभक्तिवाच्यत्वेन तद्विवक्षयाऽपि दोषानुद्धारादित्याशयः ॥

दीर्घोभवतीति । (कै)

"[4]दून्हन्" इति नियमेनानिवर्त्तितत्वादिति भावः । अर्थवत्परिभाषासिद्धार्थानुवादोऽयम् ॥

---

१ वर्णग्रहणं च सर्वत्र । वा ॥

२ अलैवाऽनर्थकेन नान्येनानर्थकेनेति वक्तव्यम् ॥

३ अलैवेति चैकत्वसंख्या गुणत्वाद्विवक्ष्यते । कै ॥

४ अ ६ । पा ४ । सू २१॥

(अ १। पा. १। आ. ६) (येन विधिस्तदन्तस्य । १। १। ७२ ।)

संपर्य्युपेभ्य इति । (कै)

वृत्तिपाठमनुसृत्येदम् ॥

तस्योच्छब्देनेति । (कै)

[1]वा पदान्तस्य (पा)

इत्यतः पदग्रहणमनुवर्त्त्य तस्योदा विशेषणादुदन्तस्य पदस्य इत्यर्थ उचितः ॥ नन्वव्यभिचारात्तवर्गणोदोऽपि विशेषणं व्यर्थमत आह

वा निवृत्तत्वादिति । (कै)

पदग्रहणमपि फलाभावान्निवृत्तं विशेषणं चेत्यपि बोध्यम् ॥

पदप्रकरणात् । (कै)

[2]एडः पदान्तादति (पा)

इत्यतः ॥ नन्वत्र करोतिर्न भूषणार्थोऽत आह

भूषणेति । (कै)

पायसं भूषयतीत्यर्थसम्भवादिति भावः ॥

[3]केवलपदाधिकारोऽपीति । (कै)

अन्यथाऽसन्देहायोत्तरपदेत्येव वदेदिति भावः ॥ भाष्ये

नापीति । (भा)

समासचरमावयवे तस्य रूढ़त्वादिति भावः ॥ नन्वेवं तदन्त-विधभावे वृत्तग्रहणावित्याद्यसिद्धिस्तदन्तविधौ तु प्रीहानावित्यत्र दोषोऽत आह

---

१ अ ८। पा ४। सू ५९ ॥ २ अ ६। पा १। सू १०९ ॥

३ पदाङ्गाधिकारे इत्यत्र च केवलपदाधिकारोऽपि ग्रहीष्यते ॥

(येन विधिस्तदन्तस्य । १। १। ७२ ।) (अ. १। पा. १। आ. ६)

अलैवेति ॥ (कै)

ननु वार्त्तिकोक्तोऽपि फलतस्तदन्तविधिरेवेत्यत आह

प्राथम्येति । (कै)

सौत्रतदन्तविधिरेव ज्यायान् न तु वार्त्तिकोक्तोत्तरपदस्य इत्यंश इति नियम आवश्यक इति भावः ॥

परमादिरिति । (कै)

परमादिः समास उद्देश्यो महच्छब्दो न भवतीति विधेयं बोध्यम् ॥ भाष्ये

अन् इति । (भा)

"[१]अल्लोपोऽनः" "[२]इन्हन्पुषे"ति "[३]अत्वसन्तस्य" "[४]मन" इत्यादिषु वर्त्तमानानीत्यर्थः ॥

अर्थवानेवासिति । (कै)

इदं चिन्त्यम् । क्ते ह्यागमे तद्विशिष्टस्यैवार्थवत्ताया न्याय्यत्वादन्यत्र भाष्ये स्पष्टमुक्तत्वाच्च ॥

न्यायेनेति । (कै)

अत एव "[५]इको यणचौ" त्यादौ न दोषः ।

[६]यस्मिन् विधिः (वा)

इति वाचनिकमेव "यस्मिन्" इति सप्तम्यन्तोपलक्षणं सप्तम्यन्तं यच्च विशेषणं तच्चेति यावत् ॥

---

१ अ ६ । पा ४ । सू १३४ ॥ २ अ ६ । पा ४ । सू १२ ॥

३ अ ६ । पा ४ । सू १४ ॥ ४ अ ३-४ । पा २-१ । सू ८२-६ ॥

५ अ ६ । पा १ । सू ७७ ॥ ६ यस्मिन्विधिस्तदादावल् ग्रहणे । वा ॥

वृद्धिर्यस्याचामादिस्तद्वृद्धम्। १।१।७३॥

ननु वृद्धिग्रहणाभावे सर्वत्र वृद्धसंज्ञायां विशेषणान्तराणां वैयर्थ्यमेव स्यादिति तन्माचार्येपोऽनुपपन्न इति शङ्कते

असतीति । (कै)

संकोचे प्रमाणाभावाद्च् शब्देन सर्वेष्वचु गृह्यमाणेषु तदादिः समीपो हलेव भवतीति परिहरति

यस्येति ॥ (कै)

ननु "अचाम्" इति[1] निर्द्धारणे षष्ठी निर्द्धारणं च तुल्यजातीयस्येति यस्यादिरचां मध्ये कश्चिदिति विज्ञायमाने दत्तादौ नाति प्रसक्तिरत आह

असतीति ॥ (कै)

समीपार्थ इति । (कै)

पूर्वसमीपार्थ इत्यर्थः । एवं च तन्निरूपितसम्बन्धे षष्ठी न तु निर्द्धारण इति भावः । यस्याचामादिर्हलित्यर्थः स्यादिति तात्पर्यम् ॥

नामधेयस्य त्विति । (कै)

"वा नामधेयस्य" इति वचनादिति भावः ॥ भाष्ये

१ यतश्च निर्द्धारणम् (२ । ३ । ४१) इत्यनेन षष्ठी ॥

(वृद्धिर्यस्याचामादिस्तद्वृद्धम् । १। १। ७३ ।) (अ. १। पा. १। आ. ६)

अचाऽपीति । (भा)

अणप्रकृतावपीत्यर्थः ॥ नन्वेवं हलादेः सर्वस्य वृद्धत्वे "[1]प्रस्थेऽवृद्धम्" इति सूत्रे कर्क्यादिप्रतिषेधोऽनर्थकोऽत आह

प्रस्थ इति ॥ (कै)

तदित्यस्यानुपादान इति । (कै)

तदित्यस्याप्यनुपादाने इत्यर्थः ॥

वृद्धेरेवेति । (कै)

तथाच प्रदेशेषु त्यदादिविषये मुख्यो वृद्धशब्दोऽन्यत्र वृद्धघटिते लाक्षणिक इति वैरूप्य प्रसङ्ग इति भावः ॥ ननु "[2]मालादीनाम्" इति लिङ्गादादिसहचरितो यस्य वृद्धिस्तस्यापि संज्ञा स्यादत आह

मालादीति ॥ (कै)

भाष्ये

अथादीति । (भा)

"अचाम्" इति षष्ठ्युपादानसामर्थ्यादादिशब्दोऽध्याहरिष्यत इति प्रश्नः । यस्यावयविनोऽवयवानामचां मध्ये वृद्धिरप्यवयव इत्यध्याहारं विनैवार्थसम्भवेऽध्याहारे मानाभाव इत्युत्तराशयः ॥ तच्च प्रसङ्गादादिग्रहणसत्त्वासत्त्वयोराद्यन्तवत्सूत्रस्थैकग्रहणप्रयोजनं दर्शयति

सति चेति । (कै)

असत्येकग्रहणे पूर्वसहितेऽपि भाशब्दाकारे आदिवत्त्वात् सभासन्नयनस्यापि वृद्धत्वं स्यादिति भावः ॥

---

१ प्रस्थेऽवृद्धमकर्क्यादीनाम् (६ । २ । ८७) ॥

२ अ ६ । पा २ । सू ८८ ॥

अच इति। (कै)

"एरच" इत्यर्थः। तच्च हि धातोरित्यधिकार इति भावः। घञचोः खरे विशेषः॥ नन्वेवं यस्य वृद्धिरवयव इत्येव सिद्धेऽचामितिव्यर्थमत आह

अचामिति। (कै)

तथाच राट्शब्दादेर्वृद्धत्वं नेति भावः। कृते त्वादिग्रहणे यच वृद्धेरादित्वमेवाजपेक्षया नत्वनादित्वं तस्यैव तेन ग्रहणान्न सभासञ्ज्ञयने दोषः। अचामिति बहुत्वमविवक्षितं तेन मालीयादिसिद्धिः॥ ननु यच हलघटिता अच एव सन्निविष्टास्तत्रास्य प्रवृत्तिरुचिता न तु हलन्तरितेष्वचु इति मन्यमानः शङ्कते भाष्ये

[1]वृद्धसंज्ञायामिति॥ (भा)

नन्वस्येव मात्रकापाठे सन्निवेशोऽत आह

सर्वस्येति। (कै)

वृद्धत्वप्रयुक्तकार्य्यभाज इत्यर्थः। वृद्धत्वनिबन्धनकार्य्यस्य प्रातिपदिके सत्त्वादिति भावः॥

अचामित्यनेन च केवलानामिति। (कै)

सर्वपदानां सावधारणत्वेन प्रथमतस्तस्यैव प्रतीतेरिति भावः। अज्मात्रसम्बन्धिनो यस्य समुदायस्याऽऽदिर्वृद्धिरित्यर्थः स्यादिति तात्पर्य्यम्॥ ननु प्रथमान्ताच्पदाभावादजेवादिरित्ययुक्तमत आह

---

१ वृद्धसंज्ञायामजसंनिवेशादनादित्वम्। वा॥

अजिति । (कै)

निर्द्धारणषष्ठ्याश्रयणान्निर्द्धारणस्य समानजातीयविषयत्वाच्च तल्लाभ इति भावः । अज्झल्समुदायेऽप्यजपेक्ष एवादिर्ग्रहीष्यते इति भाष्याचरार्थः ॥

[1]वृद्धिविशेषणार्थेति । (कै)

तस्याः प्रधानत्वादचामिति तस्या एव विशेषणं स्यादित्यर्थः । निर्द्धार्य्यमाणनिर्द्धारणावयोः सजातीयत्वाच्च वृद्धेरच्त्वलाभः । तच्च वृद्धेरच्त्वाव्यभिचाराद् विशेषणसामर्थ्येन आचरसमाम्नायिकाज्झूपलक्षणवृद्धिपरिग्रह इति भावः ॥

आकारस्य निवृत्तिप्रसङ्ग इति । (कै)

वृद्धसंज्ञानिमित्तत्वनिवृत्तिराकारस्य स्यादित्यर्थः ॥ तत्रासाधारणं प्रत्युदाहरणमाह

[2]ततश्चेति ॥ (कै)

भाष्योक्तस्य साधारणत्वं ध्वनयन्नाह

समुदायेति । (कै)

यस्येत्याद्यपेक्षया षष्ठीतिभावः । एवं यस्येति आद्युपजनितव्यतिरेके षष्ठीमङ्गीकृत्याऽचामिति निर्धारणषष्ठ्यां दोषोऽभिहितः ॥ अनुपजनितव्यतिरेके यस्येति षष्ठ्यामपि तं वक्तुं भाष्ये एकान्तादित्युक्तं तद्व्याचष्टे

---

१ वृद्धिविशेषणार्था निर्द्धारणे षष्ठी स्यात् ॥

२ ततश्चाश्वलायन इत्यत्र न स्यात् ॥

[1]एकान्ता इति । (कै)

यस्य प्रातिपदिकस्येतिसम्बन्धः । एवं च यत्प्रातिपदिकावयवभूताऽचामादिर्वृद्धिस्तत्प्रातिपदिकं वृद्धमिति सूत्रार्थः ॥ नन्वादिग्रहणादेव सर्वेषामचामिति लभ्यतेऽत आह

[2]आदिग्रहणमिति ॥ (कै)

उभयरूपत्वेऽपीति । (कै)

अञ्झल्रूपत्वेऽपीत्यर्थः । यस्येति नाचां विशेषणं तेषामन्यविशेषणत्वाद् नाद्यादेर्व्यवहितत्वात् किन्तु वृद्धेः । अचामिति चादेर्विशेषणं सन्निधानाद् न वृद्धेर्व्यवहितत्वात् । एवं च यस्य वृद्धिरचामादिरित्युक्ते लभ्यस्याऽजपेक्षादित्वस्योपपत्तये मध्येवर्त्तमानापि हलाकृतिर्न विवक्ष्यते इति भावः ॥

सकलाजिति । (कै)

संकोचे मानाभावः ॥

सतोऽपीति । (कै)

आदौ मध्ये वेतिशेषः ॥

अचामितीति । (कै)

केवलाच् सन्निवेशासम्भवादिति भावः ॥

---

१ एकान्ता अवयवा अचः प्रातिपदिकस्य तेषामचाम् आदिर्वृद्धिर्यस्य तद्वृद्धमित्यर्थः ॥

२ आदिग्रहणं त्वन्यनिवृत्त्यर्थं स्यात् ॥

(वृद्धिर्यस्याचामादिस्तद्वृद्धम् । १। १। ७३ ।) (अ. १। पा. १। आ. ६)

[1]स्वरविधाविति । (कै)

स्वरे विधेये इत्यर्थः ॥

अयोग्यत्वादिति । (कै)

स्वराणामजधर्मत्वादिति भावः । अत एव "[2]यतोऽनाव" इत्यनाव इति प्रतिषेधः सार्थकः ॥

[3]नुड् ग्रहणादिति । (कै)

हल्स्वरप्राप्तिविषयकमेवाऽनाव इति ज्ञापकमितिभावः । अन्यथा नुटोऽविद्यमानत्वादच्खानित्यादौ "[4]वृखाद्" इत्येव मतुप उदात्तत्वं सिद्धमिति तद्वैयर्थ्यं स्यादिति तत्तात्पर्य्यम् ॥

[5]पौरषेयमिति । (कै)

आधुनिकमित्यर्थः ॥

गृह्यते इति । (कै)

अत्र वार्त्तिकेत्यादिः । अत एव "[6]एङ् प्राचां देशे" इति चरितार्थं रूढ़माचस्य नामत्वेन ग्रहणे तद्वैयर्थ्यं स्पष्टमेव । घटीय इति "[7]गहादि" त्वात्साधु घाट इति त्वसाधु । अत एव भाष्ये देवदत्तशब्द उदाहृत इति भावः ॥ भाष्ये

---

१ यथा स्वरविधौ अयोग्यत्वाद्यञ्ञनमविद्यमानवदेवमिहाप्यचामिति वचनादित्यर्थः ॥

२ अ ६ । पा १ । सू २१३ ॥ ३ वृखनुड्भ्यां मतुप् । ६ । १ । १७६॥

४ वा नामधेयस्य (वा) इति वार्त्तिके पौरषेयं नाम गृह्यते ॥

५ अ १ । पा १ । सू ७५ ॥ ६ अ ४ । पा २ । सू १३८ ॥

[1]गोचान्ताद्वेति । (भा)

गोत्रप्रत्ययान्तोत्तरपदादित्यर्थः । चारायणो गोत्रान्तो यथाऽसमासे वृद्धत्वाच्छं लभते तथा समासे वृद्धत्वाभावेऽपीत्यर्थः । वेत्यनेन वृद्धसंज्ञा वा कर्त्तव्या इदमुपसंख्यानं वेत्युक्तं भवति ॥

युवेतीञिति । (कै)

प्रकृते च गोत्रशब्देनापत्यमात्रम् । अपत्याधिकारादन्यत्वादिति भावः ॥ ननु "ओदनपाणिनीया" इत्यत्र वृद्धत्वे छोऽसमस्तवदतिदेशे ञ्नन्तत्वाद् "[2]ञ्नश्च" इत्यणिति भेदः स्यादत आह

तेनेञश्चेति । (कै)

येन यूनि विहितो न गोत्रे तेनेत्यर्थः । "ञ्नश्च" इत्यत्र गोत्र इति वर्त्तते पारिभाषिकं च तत्र गोत्रं गृह्यते इति भावः । यत्तु तेन लुकेति तन्न प्रत्ययलक्षणस्य दुर्वारत्वात् ॥ भाष्ये [3]जिङ्काकात्यादिवर्जनं वृद्धसंज्ञापक्षेऽपि द्रष्टव्यम् ॥

[4]अणिति । (कै)

न च केवलेभ्यः कण्वादिभ्यश्छस्यापवादः । वृद्धसंज्ञापक्षे तु समुदायस्य कण्वादिषु पाठाभावात् प्रत्ययविधौ तदन्तविधिप्रतिषेधाच्च न तत्प्राप्तिरिति भावः ॥

---

१ गोत्रान्ताद्वाऽसमस्तवत् । वा ॥ २ अ ४ । पा २ । सू ११२ ॥
३ जिङ्काकात्यहरितकात्यवर्जम् । वा ॥
४ कण्वादिभ्यो गोत्रे । ४ । २ । १११ ॥

त्यदादीनि च । १ । १ । ७४ ॥



भाष्ये

[1]अनुवर्त्तते इति । (भा)

पूर्वसूत्रात् परतो गच्छति नवेति विचारः ॥ ननूपसर्जनानां गणबहिर्भावेन कथन्तदादित्वमत आह

आदीति । (कै)

सामर्थ्याद् भूतपूर्वगतिराश्रयिष्यत इति भावः ॥

अचामित्यस्य त्विति । (कै)

दृहादिग्रहणसम्बन्ध एव भाष्यतात्पर्य्यमिति भावः ॥ व्यपदेशिवद्भावेन केवलेऽपि सिद्धमिति दृह च नेति भाष्यमयुक्तमत आह

व्यपदेशिवदिति । (कै)

स निषेधः प्रत्ययविधौ तन्माचोपयोगिसंज्ञाविधौ चेति भावः । तदनाश्रित्यैवेदम् ॥ ननु नपुंसके भावे क्तक्त्युटौ घञजपवादौ स्त्र्यधिकारात् परतो वामरूपविधिश्च नेति सम्बन्धमिति नपुंसक-प्रथमैकवचनमनुपपन्नमत आह

द्वितीयान्तमिति ॥ (कै)

नपुंसकेऽपीति । (कै)

"घञजपः पुंसि" इति भावघञ्विषयकं क्वाचित्कञ्चेति भावः ॥

---

१ यस्याचामादिग्रहणमनुवर्त्तते उताहो न ॥

चेतनावतस्त्यागोपादाने सम्भवतो यस्मादित्यस्य तु कथं ते स्यातामत आह

एतदिति। (कै)

योग्यत्वादादित्यस्यैङित्येकवचनान्तेन सम्बन्ध इति शेषः। तुल्यजातीयस्येत्युपलक्षणं "त्यदादीनि" इत्यनेनाऽऽदित्यस्य भिन्न-विभक्तिकत्वाच्चेत्यपि बोध्यम्॥

एङ् प्राचां देशे। १। १। ७५॥

[1]कुणिनेति। (कै)

विधेयसम्बन्धलाभात् प्राङ्ग्रहणमाचार्य्यनिर्देशार्थमन्यथा प्राग्-देश इत्येव वदेदिति भावः॥ लक्ष्यावैषम्याय च व्यवस्थितविभाषा-श्रयणं तत्फलमाह

तेनेति॥ (कै)

अन्येन त्विति। (कै)

श्रुतान्वये सम्भवत्यन्येनान्वयोऽनुचित इति तद्भावः॥ वाहीकश्च देशविशेषस्तत्र स ग्रामः प्राग्देशबहिर्भूतः। वाहीकदेशश्चोभय-सम्बद्धः प्राग्देशबहिर्भूतो वा। अत एव "[2]अव्ययात्यप्" इति सूत्रे

---

१ कुणिना प्राग्ग्रहणमाचार्यनिर्देशार्थं व्यवस्थितविभाषात्वञ्च। "ऋषि-रासीन् महावीर्य्यः कुणिर्गर्गो महायशाः"॥

महाभारत – कर्णपर्व – ५३ अध्याय॥

२ अ ४। पा २। सू १०४॥

[1]शाकलनान्नो ग्रामस्य उदीच्यवाह्लीकोभयरूपता भाष्यकृतोक्ता । एतेनोभयबहिर्भूता वाह्लीका इत्यपास्तम् ॥

---

१ "तेभ्यष्ठञ्ञिठौ" इति वार्त्तिकव्याख्यानावसरे उक्तं भगवता । तथा च भाष्यम् "तेभ्यस्त्यबादिभ्यष्ठञ्ञिठौ भवतो विप्रतिषेधेन । अत्ययात्त्यब्भवतीत्यस्यावकाशः । अमात्यः । ठञ्ञिठयोरवकाशः । कारन्तविकी । कारन्तविका । आराद्ग्राम **वाह्लीक**ग्रामस्तस्मादुभयं प्राप्नोति । आराट्की । आराट्का । तीरोत्तरपदादञ्भवतीत्यस्यावकाशः । कखतीरः । कखतीरी । ठञ्ञिठयोः स एव । कास्तीरो नाम **वाह्लीक**ग्रामस्तस्मादुभयं प्राप्नोति । कास्तीरिकी । कास्तीरिका । रूप्योत्तरपदाञ्ञो भवतीत्यस्यावकाशः । चणारूप्य चाणारूप्या । ठञ्ञिठयोः स एव । दासरूप्यं नाम **वाह्लीक**ग्रामस्तस्मादुभयं प्राप्नोति । तौ चापि ठञ्ञिठौ परत्वाद्यौपधलक्षणो वुञ्बाधते । दासरूप्यकः । उदीच ग्रामाच्च बह्वचोऽन्तोदात्तादञ् भवतीत्यस्यावकाशः । शिवपुर शैवपुरः । ठञ्ञिठयोः स एव । **शाकलं** नाम **वाह्लीक**ग्रामस्तस्मादुभयं प्राप्नोति । शाकलिकी । शाकलिका । कोपधादण् भवति इत्यस्यावकाशः । निलीनक नैलीनकः । ठञ्ञिठयोः स एव । सोसुकं नाम **वाह्लीक**ग्रामस्तस्मादुभयं प्राप्नोति । तौ चापि ठञ्ञिठौ परत्वात् कोपधलक्षणश्छो बाधते । सौसुकीयः ।" ४ । २ । १०४ ॥

शाकलं नाम नगरम् आपगा नाम निम्नगा ।
जर्त्तिका नाम वाह्लीकास्तेषां वृत्तं सुनिन्दितम् ॥
नगरे **शाकले** स्फीते आहत्य निशि दुन्दुभिम् ।
कदा वाहेयिका गाथाः पुनर्गास्यामि **शाकले** ॥

महाभारत – कर्णपर्व – ४४ अध्याय ।

वाह्लीकग्रामाविति । (कै)

आद्ये अस्याप्राग्देशीयाविति शेषः पूरणीय इति बोध्यम्। अन्यथा कुणिमताश्रयणेऽस्य प्रमाणता नोपपद्यते ॥

ठञ्ञिठाविति । (कै)

"[1]वाह्लीकग्रामेभ्यश्च" इत्यत्र वृद्धादित्यनुवृत्तेः। प्राग्दक्षिभागस्तु "[2]ग्रारवत्यास्तु योऽवधेः। देशः प्राग्दक्षिणः प्राच्य उदीच्यः पश्चिमोत्तर" इत्यमरेण दर्शितः। ग्रारवती चोत्तरपूर्वाभिमुखीत्येके। ऐशानीतो नैर्ऋत्यां पश्चिमाभिगामिनी सेत्यन्ये। उभयथापि प्रगुदक्स्वरूपे न विवादः। वाह्लीकलक्षणं च "[3]पञ्चानां

---

१ अ ४। पा २। सू.११७ ॥

२ लोकोऽयं भारतं वर्षं ग्रारवत्यास्तु योऽवधेः।
देशः प्राग् दक्षिणः प्राच्य उदीच्यः पश्चिमोत्तरः ॥
अमरकोष – भूमिवर्गः ॥

३ देशांश्च विविधान् चित्रान् पूर्वदत्तांश्च पार्थिवान्।
ब्राह्मणाः कथयन्ति स्म धृतराष्ट्रनिवेशने ॥
तत्र वृद्धः पुरावृत्ताः कथाः कश्चिद् द्विजोत्तमः।
वाह्लीकदेशान् मद्रांश्च कुत्सयन् वाक्यमब्रवीत् ॥
बहिष्कृता **हिमवता गङ्गया** च बहिष्कृताः।
सरस्वत्या यमुनया कुरुक्षेत्रेण चापि ये ॥
पञ्चानां **सिन्धु**षष्ठानां नदीनां ये ऽन्तराश्रिताः।
तान् धर्मबाह्यानशुचीन् **वाह्लीकान्** परिवर्जयेत् ॥

सिन्धुषष्ठानामन्तरं ये समाश्रिताः । वाह्लीका नाम ते देशा न तत्र दिवसं वसेद्" इति कर्णपर्वणि । एवं च धर्मबहिर्भूतत्वाद्वाह्ली-

---

गोवर्द्धनो नाम वटः सुभद्रं नाम चत्वरं ।
एतद्राजकुलद्वारमाकुमारात् स्मराम्यहम् ॥
कार्य्येणात्यर्थगूढेन वाह्लीकेषूषितं मया ।
तत एषां समाचारः संवासाद् विदितो मया ॥
शाकलं नाम नगरमापगा नाम निम्नगा ।
जर्त्तिका नाम **वाह्लीका**स्तेषां वृत्तं सुनिन्दितम् ॥
धाना गौड्यासवं पीत्वा गोमांसं लशुनैः सह ।
अपूपमांसमद्यानामाशिनः शीलवर्जिताः ॥
गायन्त्यथ च नृत्यन्ति स्त्रियो मत्ता विवाससः ।
नगरागारवप्रेषु वह्निर्माल्यानुलेपनाः ॥
मत्तावगीतैर्विविधैः खरोष्ट्रनिनदोपमैः ।
अनावृता मैथुने ताः कामचाराश्च सर्वशः ॥
आक्रोशन्त्योन्यसूक्तानि प्रब्रूवाणा मदोत्कटाः ।
हे हते हे हतेत्येवं स्वामिभर्तृहते ति च ॥
आक्रोशन्त्यः प्रनृत्यन्ति व्रात्याः सर्वस्वसंयताः ।
तासां किलावलिप्तानां निवसन् कुरुजाङ्गले ॥
कस्मिद् **वाह्लीक**दुष्टानां नातिहृष्टमना जगौ ।
सा नूनं वहती गौरी सूक्ष्मकम्बलवासिनी ॥
मामनुस्मरती शेते **वाह्लीकं** कुरुजाङ्गले ।
शतद्रुकामहं तीर्त्वा तां च रम्यां **मिरावतीम्** ॥

कत्वम्। शतद्रुविपाशैरावतीवितस्ताचन्द्रभागेति पञ्चनद्यः सिन्धुः षष्ठस्तन्मध्यदेशो वाहीक इति तद्व्याख्यातारः। कुणिमताश्रयणे

गत्वा स्वदेशं द्रक्ष्यामि स्थूलशङ्खाः शुभाः स्त्रियाः।
मनः श्लिष्टोज्ज्वलापाङ्गो गौर्य्यस्त्रीकुदोऽङ्गनाः॥
कम्बलाजिनसंवीताः क्रदन्त्यः प्रियदर्शनाः।
मृदङ्गानकशङ्खानां मङ्गलानां च निःस्वनैः॥
खरोष्ट्रोश्वतरस्त्रैव मत्ता यास्यामहे सुखम्।
ग्रामीपीलुकरीराणां वनेषु सुखवर्त्मसु॥
अपूपान् सक्तुपिण्डांश्च प्राश्नन्तो मथितान्वितान्।
पथि सुप्रबला भूत्वा कदा सम्प्रततोऽध्वगान्॥
चेलापहारं कुर्वानास्ताड़यिष्याम भूयशः।
एवं शीलेषु ब्राह्येषु **वाहीकेषु** दुरात्मसु॥
कस्चेतयानो निवसेत् मुहूर्त्तमपि मानवः।
इदृशा ब्राह्मणेनोक्ता **वाहीका** मोघचारिणः॥
येषां षड्भागहर्ता त्वमुभयोः शुभपापयोः।
इत्युक्ता ब्राह्मणः साधुरुत्तरं पुनरुक्तवान्॥
वाहीकेष्वविनीतेषु प्रोच्यमानं निबोध तत्।
तत्र स्म राक्षसी गीतिः सदा क्षणचतुर्दशीम्॥
नगरे **शाकले** स्फीते आहत्य निशि दुन्दुभिम्।
कदा वाहेयिका गाथाः पुनर्गास्यामि **शाकले**॥
गव्यस्य दध्नो मांसस्य पीत्वा गौड़ं सुरासवम्।
गौरीभिः सह नारीभिर्दृढतीभिः स्वलङ्कृता॥

(एङ् प्राचां देशे। १। १। ७०।) (अ. १। पा. १। आ. ६)

ग्रैषिकेष्वित्यस्य वैयर्थ्यं व्यवस्थितविभाषयैव सिद्धेः। अतोऽन्यमताश्रयेणैव भाष्यम्। भाष्यप्रामाण्याच्चैतावबाह्लीकग्रामावपीत्यन्ये।

पलाण्डुगण्डूषयुतान् खादन्ती चैडकान् बह्वन्।
वराहं कौक्कुटं मांसं गव्यं गर्दभमौष्ट्रिकम्॥
ऐडं च ये न खादन्ति तेषां जन्मनिरर्थकम्।
इति गायन्ति ये मत्ताः सीधुना **शाकलाश्च** ये॥
स बालवृद्धाः क्रन्दन्तस्तेषु धर्मः कथम्भवेत्।
इति मूल्य विजानीहि हन्त भूयो ब्रवीमि ते॥
यदन्योऽप्युक्तवानस्मान् ब्राह्मणः कुरु संसदि।
पञ्च नद्यो वहन्त्येता यत्र पीलुवनान्युत॥
शतद्रुश्च विपाशा च तृतीयैरावती तथा।
चन्द्रभागा वितस्ता च **सिन्धु**षष्ठो बहिर्गिरेः॥
आरट्टा नाम ते देशा नष्टधर्मा न तान् व्रजेत्।
ब्रात्यानां दासमीयानां **वाह्लीका**नामयज्वनाम्॥
न देवाः प्रतिगृह्णन्ति पितरो ब्राह्मणास्तथा।
तेषां प्रनष्टधर्म्याणां **वाह्लीकान**मितिश्रुतिः॥
ब्राह्मणेन तथा प्रोक्तं विदुषा साधुसंसदि।
काष्ठकुण्डेषु **वाह्लीका** मृण्मयेषु च भुञ्जते॥
सक्तुमद्यावलिप्तेषु श्यावलौढ़ेषु निर्घृणाः।
आविकश्चौष्ट्रिकश्चैव क्षीरं गर्दभमेव च॥
तद्विकारांश्च **वाह्लीकाः** खादन्ति च पिबन्ति च।
पुत्रसङ्करिणो जाल्माः सर्वान्नक्षीरभोजनाः॥

भाष्योक्तव्यवस्थितविभाषातिरिक्ता न व्यवस्थिता इत्यस्यार्थस्य शैषिकेष्विति ज्ञापकमित्यपरे ॥

आरट्टा नाम **वाहीका** वर्जनीया विपश्चिता ।
हन्त शल्य विजानीहि हन्त भूयो ब्रवीमि ते ॥
यदन्योऽप्युक्तवान् मह्यं ब्राह्मणः कुरु संसदि ।
युगन्धरे पयः पीत्वा प्रोष्य चाप्यच्युतस्थले ॥
तद्दुतिलये स्नात्वा कथं स्वर्गं गमिष्यति ।
पञ्चनद्यो वहन्त्येता यत्र निःसृत्य पर्वतात् ॥
आरट्टा नाम **वाहीका** न तेष्वार्यो ह्यहं वसेत् ।
वहिश्च नाम हीकश्च विपाशायां पिशाचकौ ॥
तयोरपत्यं वाहीका नैषा सृष्टिः प्रजापतेः ।
— — — — — — — — — —॥

कारस्करान् माहिषकान् कालिङ्गान् केरलांस्तथा ।
कर्कोटकान् वीरकांश्च सुधर्मांश्च विवर्जयेत् ॥

महाभारत – कर्णपर्व – ४४ अध्यायः ।

आमत्स्येभ्यः कुरुपाञ्चालदेश्या
आनैमिषाच्चेदयो ये विशिष्टाः ।
धर्मं पुराणमुपजीवन्ति सन्तो
मद्रादृते **पाञ्चनदांश्च** जिह्मान् ॥

पूज्यमाने पुराधर्मे सर्वदेशेषु शाश्वते ।
धर्मं पाञ्चनदं दृष्ट्वा धिगित्याह पितामहः ॥

(एङ् प्राचां देशे । १ । १ । ७५ ।) (अ. १ । पा. १ । आ. ६)

अपत्येत्यादि । (कै)

"[1]उदीचां वृद्धाद्" इति "[2]नित्यं वृद्ध" इति चेति सर्वेष्टसिद्धिः ॥

इति कालोपनामकशिवभट्टसुतसतीगर्भजनागोजिभट्टविरचिते महाभाष्यप्रदीपोद्द्योते प्रथमाध्यायस्य प्रथमे पादे नवममाह्निकम्

पादश्चायं समाप्तः ॥

इति शिवम् ॥



---

१ अ ४ । पा १ । सू १५७ ॥ २ अ ४ । पा ३ । सू १४४ ॥

ब्राह्मं पाञ्चालाः कौरवेयास्तु धर्म्यं
सत्यं मत्स्याः शूरसेनाश्च यज्ञम् ।
प्राच्या दासा दाक्षिणात्या-
स्तेना **वाह्लीकाः** सङ्करा वै सुराष्ट्राः ॥
कृतघ्नता परवित्तापहारो मद्यपानं गुरुदारावमर्दः ।
वाक्पारुष्यं गोवधो रात्रिचर्या वह्निर्गेहं परवस्त्रोपभोगः ॥
येषां धर्मस्तान् प्रति नास्त्यधर्मो
ह्यारट्टानां पञ्चनदान् धिगस्तु ।
आपाञ्चालेभ्यः कुरवो नैमिषाश्च
मत्स्याश्चैतेऽप्यथ जानन्ति धर्मम् ॥


महाभारत – कर्णपर्व – ४५ अध्यायः ।

शुद्धिपत्रम् ।

पृष्ठाङ्कः ।	पङ्क्त्यङ्कः ।	अशुद्धम् ।	शुद्धम् ॥
१०१	१९	तद्वारैव	तद्वारैव ।
१०२	१८	मास तु	मास्तु ।
१०८	१२	अथवेत्यक्तेः	अथवेत्युक्तेः ।
१०८	१६	पूर्वक्तो	पूर्वंक्तो ।
११७	५	इष्ठिरिति	इष्टिरिति ।
११९	१३	सेन्द्रस्येति	नेन्द्रस्येति (पा) ।
१२०	६	अर्ग्रग्रब्दात्	अर्ग्रः ग्रब्दात् ।
...	१९	... ...	... ...
१३६	१६	अनुवर्त्यस्यादिति	अनुवर्त्यंस्यादिति ।
१४०	७	भाष्यकारास्त्विति	भाष्यकारस्त्विति ।
१४०	१०	भाष्ये	०
१५२	२	गुणवृद्धिग्रहणस्यो-	गुणवृद्धिग्रहणस्यो ।
१५७	२	उणादिनाम-	उणादीनाम- ।
१७१	१७	दूषणो-	दूषणो- ।
१९१	१४	विधापकत्वे	विधायकत्वे ।
२१३	१३	दुह्यमानसु	दुह्यमानासु ।
३२४	१८	सिंहग्रब्दस्य	सिंहग्रब्दस्य ।
३९५	१८	सुसाधवः	सुसाधवः ।
...	२४	धारूपाणि	धातुरूपाणि ।
५१९	११	एतत्सुत्रो-	एतत्सूत्रो- ।
५७९	१५	नखविदलादि-	नखविदलनादि- ।
५७८	१९	ग्लिल्करणादेवाच	ग्लिल्करणादेवाच ।

पृष्ठाङ्कः ।	पङ्क्त्याङ्कः ।	अशुद्धम् ।	शुद्धम् ।
५७९	८	पंचमी-	पञ्चमी- ।
५९६	१२	तद्वारके	तद्वारके ।
६०१	२२	प्रतिपद्यते	प्रतिपद्यते ।
६०८	१	प्रश्नेष-	प्रश्लेष- ।
६१३	२१	तिस्र-	तिस्र- ।
६२२	३	ऽवि	ऽपि ।
६२४	१	पदान्तरस्यस्यैव	पदान्तरस्यैव ।
६८६	२१	पंचमी	पञ्चमी ।
६९५	१९	वैयात्या	वैजात्या ।
७४५	१०	आदि सिच	आदिः सिच ।

सङ्केतचिह्नम् ॥



अ ।	पा ।	आ ।	अध्यायः ।	पादः ।	आह्निकम् ।
पा	...	...	पाणिनिसूत्रम् ॥		
भा	...	...	महाभाष्यम् ॥		
वा	...	...	वार्त्तिकम् ॥		
उ	...	...	उणादिसूत्रम् ॥		
शि—सू	...	...	शिवसूत्रम् ॥		
न—का	...	...	नन्दिकेश्वरकृतकाशिका ॥		
गो—सू	...	...	गोतमसूत्रम् ॥		
सा—सू	...	...	सांख्यसूत्रम् ॥		
यो—सू	...	...	योगसूत्रम् ॥		
हरिः	...	...	भर्त्तृहरिकारिका ॥		
ऋ—सम्	...	...	ऋग्वेदसंहिता ॥		

महाभाष्यप्रदीपोद्योतान्तर्गतानां शिवसूत्राणां पाणिनिसूत्राणाञ्च वर्णानुक्रम-सूचीपत्रकम् ॥



अइउण्	(शि-सू)	...	५३, १.
अचः परस्मिन्पूर्वविधौ...	(पा) ...	...	६१५, १२.
अणुदित्सवर्णस्य चाप्रत्ययः	... ...	...	७६३, १.
अदर्शनं लोपः ...	... ...	....	६७४, १.
अदसो मात् ...	... ...	...	३०२, १.
अनेकाल्शित्सर्वस्य ...	... ...	...	५७८, १.
अन्तरं बहिर्योगोपसंव्यानयोः	... ...	...	४४२, १
अलोन्त्यस्य ...	... ...	...	५७१, १.
अलोन्त्यात्पूर्व उपधा ...	... ...	...	७२६, १०.
आदिरन्त्येन सहेता ...	... ...	...	७६४, १.
आद्यन्तवदेकस्मिन् ...	... ...	...	३५३, ४.
आद्यन्तौ टकितौ ...	.. ...	...	५१०,
इको गुणवृद्धी ...	... ...	...	१५२, १.
इग्यणः सम्प्रसारणम् ...	... ...	...	५०३, १.
ईदूतौ च सप्तम्यर्थे ...	... ...	...	३३३, ११.
ईदूदेद्द्विवचनं प्रगृह्यम्	... ...	...	२८६, १.
उञः	... ...	...	३२६, ६.
उरण् रपरः	... ...	...	५५४, ६.
ऊँ	... ...	...	३२६, ६.
ऋलृक्	(शि-सू)	...	६७, १३.
एओङ्	... ...	...	७७, १५.
एङ् प्राचां देशे ...	(पा) ...	...	८३५, ७.

एच इग् घ्रस्वादेशे	...	...	...	५२७, १.
ऐ औच्	...	... (णि–सू)	...	७७, १५.
ओत्	...	... (पा)	...	३२२, ७.
क्त्वेल्यन्तः	...	...	...	४६१, ५.
किङति च	...	...	...	२१२, ८.
क्तक्तवतू निष्ठा	...	...	...	३६५, १.
ङिच	...	...	...	५७५, १०.
झमञ्	...	... (णि–सू)	...	१०५, ५.
ञमङणनम्	...	...	...	१०७, ५.
डति च	...	... (पा)	...	३६४, १.
तद्धितश्चासर्वविभक्तिः	...	...	...	४४६, १.
तपरस्तत्कालस्य	...	...	...	७७६, ५.
तरप्तमपौ घः	...	...	...	३६४, १.
तस्मादित्युत्तरस्य	...	...	...	७३४, १३.
तस्मिन्निति निर्दिष्टे	...	...	...	७३४, १२.
तुल्यास्य प्रयत्नं सवर्णम्	...	...	...	२५४, ६.
तृतीयासमासे	...	...	...	४३५, ६.
त्यदादीनि च	...	...	...	८३४, १.
दाधाघ्वदाप्	...	... (पा)	...	३३८, १०.
दीधीवेवीटाम्	...	...	...	२३०, ११.
द्विर्वचनेऽचि	...	...	...	६००, ११.
न धातुलोप आर्द्धधातुके	...	...	...	१६५, १.
न पदान्तद्विर्वचनवरेयलोपस्वर-सवर्णानुस्वारदीर्घजश्चर्विधिषु	...	...	...	६४७, १०.
न बहुव्रीहौ	...	...	...	४३२, ४.
न लुमताङ्गस्य	...	...	..	७१३, १२.
न वेति विभाषा	...	...	...	४७६, १.

नाञ्झलौ			२८०, १.
निपात एकाजनाङ्			३१५, १.
पूर्वपरावरदक्षिणोत्तरा			४३७, १.
प्रत्ययलोपे प्रत्ययलक्षणम्			६६३, १४.
प्रत्ययस्य लुक्श्लुलुपः			६८७, १२.
बञ्गणवतुडतिसंख्या			३६७, १०.
भिदचोऽन्त्यात्परः			५२०, ४.
मुखनासिकावचनोऽनुनासिकः			२४६, १.
येन विधिस्तदन्तस्य			७६५, १६.
लण् ... ... (शि-सू) ...			१०३, ३.
विभाषा जसि ... (पा)			१३७, १.
विभाषा दिक्समासे			४२८, ११.
वृद्धिरादैच्			१११, १.
वृद्धिर्यस्याचामादिस्तद्वृद्धम्			८२७, १.
शि सर्वनामस्थानम्			४७७, ६.
शे			३१४, ५.
षष्ठीस्थानेयोगा			५३१, १.
ष्णान्ताषट्			३८६, १०.
सर्वादीनि सर्वनामानि			३६६, १.
स्थानिवदादेशोऽनल्विधौ			५८१, १.
स्थानेऽन्तरतमः			५३७, ८.
स्वमज्ञातिधनाख्यायाम्			४४१, १७.
स्वं रूपं शब्दस्याशब्दसंज्ञा			७५३, १.
स्वरादिनिपातमव्ययम्			४४३, १.
हयवरट् ... ... (शि-सू) ...			८८, ७.
हलोऽनन्तराः संयोगः ... (पा)			२३४, १.

महाभाष्यप्रदीपोद्योतस्थप्रथमपादान्तर्गतानां सूचवार्त्तिकमहाभाष्यादीनां वर्णानुक्रम-सूचीपत्रकम् ॥

अ ।

अ अ अदिति (भा) ४१३, १३.
अदड्ण् (शि-सृ) (भा) ५३, १.
अदड्णिति (कै) ... ७७२, १.
अकः (पा) ५४, ३. ५८, १५.
६६, १७. २८०, ६.
अकचौति (कै) ... ८०५, ७.
अकच्त्विति (कै) ... ४६२, १६
अकच्स्वरौ (भा) ... ४३४, ९.
अकज्झि न भवति (भा) ४३७, ८.
अकणिषमिति (भा) ३३१, १७.
अकारः सर्ववर्णाध्यः प्रकाशः
परमेश्वरः(न-का) ११९,१७.
अकारजातिरिति (कै) ६४, १८.
अकारमपि नोपलभन्त इति
(भा) ६३, १८.
अकारलोप इति (भा) २०६, १.
अकारस्यार्धमिति (भा) ७९, ५.
अकारस्येति (कै) ... ८४, १८.
१५२, १५. ५९१, १७.
अकाराकारयोरिति (कै) ३४४, १.
अकारादिति (कै) ... ४१३, १५.
अकारान्तमेतदिति (भा) ६४९, ९.
अकारावयवेति (कै) ७११, १०.
अकारेणाऽण्नामिति (कै) ७१०, १०.
अकारेणेति (कै) ... २६७, १.
अकारेत्यादि (कै) ... २८०, २.
अकारोऽपीति (कै) ५६३, ५.
अकारो नेति (भा) ७९, २०.
अकितोऽपीति (कै) ५९१, १९.
अकित्त्वस्येति (कै) २११, १०.
अकित्त्वेति (कै) ... ३५०, १.
अक्षत एवेति (कै) ६३५, १०.
अक्षपरिमाणानामिति (भा) ८०८, ९.
अक्षरम् (भा) ... १०७, १७.
१०८, १३.
अक्षरसमाम्नाय उपदिष्टा(भा) १२८, ९.
अक्षु (भा) ... ९९, १४.
अगादित्यादि (कै) ... ३५७, ३.

अग्निमीडे { ऋ वे सम् / अ-१ अ-१- / स्व-१-ऋक्-१ } ७७०, १९.

अग्नी इतीति (कै) ७०१, १९.

अगुणेति (कै) ... ७५०, १९.

अग्रं ची (भा) ... ५२४, १५.

अग्रहणपक्षे (कै) ... १७९, १.

अग्रहणेति (कै) ... ५७, १५.

अङ्गत्वात् (कै) ... ११९, १५.

अङ्गभूयस्त्वादिति (कै) १९, १३.

अङ्गमङ्गमिति (कै) ... ६९२, १२.

अङ्गविकलेति (कै) ... २२१, ९.

अङ्गविशेषणे ह्रीति (भा) २१९, १७.

अङ्गसंज्ञा तर्ह्रीति (भा) १७१, ३.

अङ्गस्येति (कै) १९७, १. १९२, ८.

अङ्गस्येति च स्थानषष्ठीति (भा) १९७, १५.

अङ्गस्येति षष्ठीति (कै) ५७१, ८.

अङ्गस्येत्यधिकारेति (कै) ७१४, १०.

अङ्गस्येत्यपि स्थानषष्ठीति (भा) १९८, ९.

अङ्गाधिकार इति (भा) १२२, ११.

अङ्गानामिति (कै) ... ६३२, ४.

अङ्गानिष्यत्या (कै) ... १८२, १८.

अङ्गार्थेति (कै) ... ४१९, १.

अङ्गेन संयोगादिम् (भा) २४१, १२.

अङ्गेन संयोगादिं विशेषयिष्यामः (भा) ... २४४, १३.

अच इति (कै) ५४२, ५. ११४, १९. ८२९, १.

अचः परस्मिन्निति (पा) ७९, १. १०५, १२.

अचः पश्चादिति (कै) ५०९, १३.

अचश्च (पा) १९८, १. २०३, १२.

अचामिति (कै) ... ८२९, ५.

अचामितीति (कै) ... ८३१, १९.

अचामित्यनेन च केवलानामिति (कै) ... ८२९, १२.

अचामित्यस्य त्विति (कै) ८३४, ८,

अचिरकृतायामिति (भा) ४८२, १९.

अचीति (कै) ६७२, १९. ७०६, १०.

अचीत्यतच तस्येति (कै) ६७४, १०.

अचो ञ्णिती (पा) १७७, १५.

अचो रहाभ्याम् (पा) ९२, ५.

अचोरिति (कै) ... २००, ८.

अचो ह्रीति (भा) ... १०३, १२.

अच्त्वाभावादिति (कै) ८७, १२.

अच्युपस्थिष्टस्येति (कै) ७४३, ४.

अजपेक्षयेति (कै) ... ६३५, १३.

अजादाविति (भा) १८६, ६.

अजादिरिति (कै) ... ७९९, १५.

अजादौ प्रत्यये इति (कै) ११२, १.

अजिति (कै) १४७, १३. ८३०, १.

अजुदिदिति (भा) ... १०१, ११.

अजेव य इति (भा) ३१७, १.

अज् प्रक्षेपेन (भा) ९९, १७.

अज् प्रक्षेपणे (भा) ... ९९, १४.
अज् मार्जस्थेति (कै) १७४, १९.
अञ्जिश्वीति (कै) ... २९८, ५.
अटि क्षते इति (कै) १८१, ४.
अट् कुट्टिति (पा) ... ८९, ५.
अडागमात्पूर्वमिति (कै) १८१, २.
अड्प्रकरणेष्विति (भा) ८८, १०.
अणः प्रसङ्ग इति (कै) ६८७, १.
अणपीति (भा) ... ५२५, १०.
अणिति (कै) ... ८२३, १४.
अणुदित्स्ववर्णस्य (पा) १७१, १.
अणुदित् (पा) ... १८०, १३.
अणेति (कै) ... ७११, ६.
अणोऽचेति (कै) ... ६८७, ९.
अणोऽप्रगृह्यस्य (पा) १५०, १५.
अण् क्षतेति (कै) ... ६०३, १.
अण् सदृश इति (कै) ७७३, १.
अत इतीति (कै) ... ७८४, १९.
अत इत्यधीति (कै) ७०५, १७.
अत इत्येवेति (भा) ... १०८, १.
अत एवेति (कै) १८०, ४. २८१.
१०. ५६१, १३. ६१६, १४.
अत एष स्निह्यादिति (कै) ६४७, ४.
अतः क्त इति (कै) ६८९, १६.
अतिक्रान्तार्थविशेषणतामिति
(कै) ४२१, ९.
अतिक्षद्र इति (भा) ६०८, १२.
अतिक्षद्रायेति (भा) ६०९, १.
अतिप्रसङ्ग उद्भावित
इति (कै) ४६०, ११.
अति वष्ट इति (भा) ४५ , १०.
अतो रोरि (पा) ... ५८, ४
अतो लोप (पा) ... १०६, १.
अतो ल्रान्तस्य (पा) ... १००, १२.
अत्यन्ताय (भा) ... १९, १९.
अत्यरराजदिति (कै) ६४१, १४.
अत्र (भा) ... १०९, ११.
अत्र ग्रहणादिति (कै) ७१३, ८.
अत्र चाचार्य्यस्येति (कै) ५, १.
अत्र चेति (कै) ५, १. ५४, १९.
१७८, १५. १७,४८.
अत्र नेति (भा) ... ४८५, ९.
अत्रय इत्यनेति (कै) ... ७१८, १.
अत्र श्नतस्येति (कै) ... १४१, १४.
अत्र हि स्तुचे इति (कै) १८०, १५.
अत्र हीति (कै) ४१३, ९. ७१६, ७.
७६१, ११.
अत्रापीट एवस्यामित्यमिति
(कै) ५९१, ९.
अत्रापीति १३०, १०. ६८७, ६.
(भा) ८१८, १.
अत्राङ्करिति (कै) ... १७१, १५.
अत्रेति (कै) १७, ७. १४०, १४.
(भा) १४४, १६. (कै) १५८, ११.
५८६, ७. ६९५, १५. ७८८, १३.
अत्रैवेति (कै) ... ४५१, १.

अत्वं चेति (कै) ... ७७४, ३.
अत्वेति (कै) ... ५५१, ९.
अथ ल्लकारेति (भा) ६७, १४.
अथ गौरिति (भा) ... ७, ३.
अथ तचेति (भा) ... १३७, १०.
अथ तुल्यति (कै) ... ६८७, ११.
अथ त्विति (कै) ५०१, १३. १६५, ९.
अथ मतमिति (भा) ... ५५६, १७.
अथ योऽवाग्योगविदिति
(भा) १९, १८.
अथ वाऽन्वर्थेति (कै) ४६१, १४.
अथवाऽस्तु तावदिति (भा) ७५१, ८.
अथवा किंचिदिति (भा) ५३३, १६.
अथवा किं न एतेनेति (भा) २७०, १.
अथवा कूपेति (भा) ४४, २०.
अथवा पुनरस्तु परादिरिति
(भा) ५६७, १४.
(भाघे) अथवा प्रतीतपदार्थक
इति (भा) ... ११, २५.
अथवा मन्यतीति (भा) ४२१, १२.
अथवा यथा रथेति (कै) ७१६, १.
अथवा योऽवेति (भा) ६१८, ९.
अथवा वत्यन्तमेतदिति (भा) ६६, १३.
अथवा व्यक्तमेवेति (भा) ७३३, १८.
अथवा सिद्धन्विति (भा) ६०४, १.
अथवा स्थानेति (कै) ५५९, ५.
अथ दृढिग्रहणमिति (भा) १९०, ५.
अथ स्तेनचोरिति (भा) ६४२, ११.
(भाघे) अथवेति १९, १३. ३३, १०.
३३, १७. ३६, ८. ५५, ७.
६२, १८. ७६, १८. (कै) १२०,
९. १५८, १२. (भा) १८५, ७.
(कै) १९५, १०. २१९, १०.
२३१, ३. (भा) २११, ८. २११,
१६. (कै) २१८, ११. २५७,
१०. (भा) २७९, ७. ४१४, ९.
४१८, ४. ४३५, १९. (कै)
४७९, १६. (भा) ५१३, ९
(कै) ५५९, १२. ५७९, ९.
५८५, ४. (भा) ६००, १६.
६५६, २. ६५७, १६. (कै)
६६६, १. ६७३, १६. ६७५, ३,
७११, १५. (भा) ७५०, १८.
(कै) ७६८, १६. ८०८, ११.
अथवेतरीति (भा) ५१, ४. ७०४, १८,
अथाजहत्स्वार्थायामिति (भा) ३३७, ६.
अथादीति (भा) ... ८१८, १३.
अथापि कथंचिदिति (भा) १७५, ७.
अथापीति (कै) ... ९४, ९.
(भा) २०७, १६. (कै) ६७०, १२.
अथेति (कै) ३९७, १८. ५४५, ११.
५७३, १. ७३६, १.
अथोभस्येति (भा) ... ४२२, १२.
अदसो मादिति (पा) १५०, १.
अदाग्धामिति (भा) ८९, ११.
अदुग्धेति (भा) ... ६६८, ३.

अदुरुद्वीति (कै) ... ६४५, ५.
अदृश्यमित्यादि (कै) ... १, १७.
अदेङ् गुणः (पा) ... ११५, ९८.
अद्यत्वेऽपीति (कै) ... ७१, १६.
अद्वैतेनेति (कै) ... २६, ४.
अधिकग्रहणं चेति (कै) ३८५, ८.
अधिकम् (कै) ... ५१६, १८.
अधिकार इति (भा) २, १६.
(कै) ४६५, २०.
अधिगतयाथातथ्या (भा) ४५, १२.
अध्यापननिर्देशः (कै) २४, १३.
अध्यापनमिति (कै) ... १५, १८.
अध्येतारश्च (भा) ... २४, १२.
अनचि चेति (पा) २७२, १. १०, ५.
अनच्कत्वादिति (भा) ६७८, १०.
अनजन्तत्वादिति (कै) ५२६, २.
अनडुहः (भा) ... ८१७, ६.
अनण् त्वादिति (भा) ५८, १५.
अनन्तरयोगेति (भा) ५६५, ५.
अनन्तरस्येति (कै) १७१, ४. ६६१, ८.
अनन्तरा (कै) २४२, ७. २४२, १६.
अनन्तविकारे इति (भा) १८ , १२.
अनन्त्यत्वादिति (भा) १६७, १३.
१८६, १५.
अनन्त्यस्य चेक इति (कै) १७६, २.
अनन्त्यस्याप्युकारस्येति (कै) १७०, १.
अनपायेति (भा) ... २६, १२.
अनपेक्षित प्रतियोगिनोः (कै) २६०, ११.
अनभिधानादिति (कै) ६४६, ६.
७१६, १६.
अनभीति (कै) ... २६, २.
अनभ्युपाय इति (भा) २६, १८.
अनयोः (भा) ... ११२, ५.
अनयोरन्तरेति (भा) २४७, २.
अनयोरि (कै) ... १३७, १३.
अनर्थकत्वादिति (कै) ६१७, १०.
अनर्थकमिति (भा) ... ५४७, १८.
अनर्थकानि वाक्यानीति (भा) १२३, ६.
अनर्थकास्त्विति (भा) ६८, ११.
अनर्थगतेरित्यस्य (भा) ६६, ६.
अनर्थित्वात् (कै) ... ५१६, १५.
अनस्त्विधाविति न कर्त्तव्यम्(कै)५८६,१२.
अनादित्वादिति (कै) ४६२, ११.
अनाश्रितमिति (कै) २७५, ४.
अनाश्रित्येति (कै) २७, ८. ७३६, ११.
अनिकारोकारेति (भा) ४६३, १६.
अनित्यत्वमेवं स्यादिति (भा) ६२, २१.
अनित्यत्वादिति (कै) १७८, १६.
अनिदितां (पा) २४३, ७.
अनियतस्येति (कै) २२४, १७.
अनिष्यादादिति (कै) ७६६, १३.
अनुः (भा) ... २६१, १.
अनुकरणेति (कै) ११५, १. ७५६, १७.
अनुकार्य्यस्य दुष्टत्वादिति (कै) ७३, १६.
अनुत्पत्तिज्ञानम् (कै) ६५, १८.
अनुत्पत्तीति (भा) ... २६, ११.

अनुदात्तोपदेशवनति (पा) २५१, ४.
अनुनासिकपरेति (कै) ८०, १२.
अनुनासिक इति (कै) ६८१, ४.
७६१, १४.
अनुपपत्तिरिति (भा) ५८, ६.
अनुपजनेति (भा) ... ३६, १२.
अनुपयोगादिति (कै) ४८७, १२.
अनुपस्थानम् (कै) ... २००, १०.
अनुप्रदानम् (कै) ... २८, १८.
अनुप्रयोग एवेति (कै) ४६१, ३.
अनुबन्धकरणार्थमिति (भा) ११८, ७.
अनुबन्धसङ्कर (भा) ... ५८, ४.
अनुबन्धकरणार्थस्येति (भा) ४८, ७.
अनुबन्धेति (कै) ... ५८१, ११.
अनुबन्धविति (कै) ... १८६, १३.
अनुमानमिति (कै) ... ५३४, १२.
अनुमीयत इति (कै) ४९१, ८.
अनुमीयन्त इति (कै) ७५, ६.
अनुमेव शतेति (कै)... ६१४, १०.
अनुमृक इति (भा) ... ६१४, ६.
अनुवर्क्षत (भा) ... १०२, ७.
अनुवर्त्तते इति ... ८३४, ३.
अनुवर्त्तमान इति (भा) ५३८, १५.
अनुवर्त्त्यं स्यादिति (भा) १३६, १६.
अनुवृत्तिनिर्देशे (कै) ७७३, १३.
अनुषङ्गो (कै) ... २४३, ५.
अनुस्वारस्य ययौ (पा) २६२, १३.
अनुस्वारस्य शर्त्वादिति (पा) ८४, १४.
अस्त इति (पा) ... ७०, ७.
अनेकमनुबन्धशतमिति (भा) ५१, ४.
अनेकं विशेष्यम् (भा) ५३५, ६.
अनेकयोगेति (कै) ... १६६, ६.
अनेकशक्तीति (कै) ... ४४४, १.
अनेकशक्तेरिति (कै)... ११४, ४.
अनेकार्थत्वादिति (कै) ३७, १२.
अनेकान्त इति (भा) ७७७, ८.
अनेकान्ता इति (भा) ३५१, ४.
अनेकान्तेनेति (भा) ... ७७४, १४.
अनेकान्तेष्विति (कै) ५८०, १३.
अनेकान्तोदीति (भा) ७७५, १५.
अनेकाल्त्वेति (कै) ... ५७८, १२.
अनेकेति (कै) ४, ८. ११२, १४.
४६७, १०.
अनेन (भा) ५०५, ११. (कै) ६७५, ११.
अनेनाऽपीति (भा) ... ६३०, ३.
अनेनेति (भा) २२५, ७. ४७५, १४.
अनेनैवेति (कै) ८, ५. ६८७, ७.
(भा) ७४८, ७.
अनैमित्तिकमात्वमिति (भा) ६७८, १०.
अन् इति (भा) ... ८१६, ६.
अन्त इति (कै) ... १३५, ५.
अन्तग्रहणमिति (कै) ४६८, ६.
अन्तत्यन्ताध्वदूरपारेति (पा) १५६, १.
अन्तरङ्ग इति (कै) ... १११, ७.
अन्तरङ्गत्वादिति (कै) ३४४, १. ५३६,
१४. २३१, ८. ५६६, १७.

अन्तरङ्गत्वादेवेति (कै) ४६४, १.
अन्तरङ्गलक्षणत्वादिति (भा) २१७, ८.
अन्तरङ्गलक्षणस्य (भा) ७६७, ४.
अन्तरङ्गवद्विरङ्ग इति (भा) ७६७, १.
अन्तरङ्गानपीति (कै) ६६४, ६.
अन्तरङ्गो बलीयानिति (कै) ५२६, ११.
अन्तरतम इति (कै) ... ५१२, १४.
अन्तरिच्च इति (कै) ... ५५०, ५.
अन्तरेणापीति (भा) ... ४२६, ४.
(कै) ५७७, १८. ७४०, १६.
अन्तरेणेवेति (भा) ... ६५६, १२.
अन्तोनिश्चय इति (कै) ५१०, १०.
अन्त्यमलमिति (कै) ... १६८, ७.
अन्त्यमिकमुपसंक्रान्ते (भा) १६८, ११.
अन्त्यमिति (भा) ... १८३, ११.
अन्त्यस्येति (भा) ... २६८, १.
(कै) ५७१, १५.
अन्त्येति (कै) ... ७१०, ७.
अन्यतरनिवृत्त्येति (कै) २१७, १५.
अन्यतरान्येति (कै) ... ६८, १६.
अन्यद्धीति (भा) ... ४६८, ८.
अन्यच (कै) ... १६८, ५.
अन्यच चेति (भा) ... ८१६, ३.
(भाष्य) अन्यचानियम इति (भा) ४५, ७.
अन्यचापि (भा) ... ८६, १७.
अन्यचेति (कै) ११, १६. ८१; ६.
